प्रवेश सं० ४३७ | विषय: वेद: | क्रम सं० ४

नाम वाजसनेयी प्रातिशाख्य भाष्यम्

ग्रन्थकार उवट:

पत्र सं० १–११८

श्लोक सं०

अक्षर सं० (पंक्तौ) ३२ | पंक्ति सं० (पृष्ठे) ८

आकार: १२·१″×५·५″ | लिपि दे·ना· | आधार कागः

वि० विवरणम्

002117

[illegible]

[illegible]

Indira Gandhi National Centre for the Arts

Pratisakhya ... p. 118

२५५ प्रातिशाख्यभाष्यम्

प्रातिशाख्य पत्र ११८

४२४

पत्राणि ११८

Indira Gandhi National Centre for the Arts

प्रा० ॐ श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ श्रीपरमगुरुभ्यो नमः ॥ श्रीमद्विमललक्ष्मीनृसिंहो
भा० विजयते ॥ यस्य भृङ्गावलिः कण्ठे स्तुनन्तदानं बुभूरिति ॥ भाति मुञ्जातमालेव स वः पाया
१ द्गणाधिपः ॥ १ जयादौ नाधिकारोऽस्ति सम्यक्कार्यमजानतः ॥ प्रातिशाख्यमतोऽयं स
म्यक्पाठस्य सिद्धये ॥ २ ॥ स्वरसंस्कारयोश्छन्दसि नियमः ॥ १ ॥ स्वर उदात्तोऽनुदात्तस्वरित
प्रचितलक्षणः स्वरसंस्कारयोश्छन्दसि विषये नियमोऽधिकृतो वेदितव्यः ॥ प्रतिज्ञासूत्रमे
तत् प्रतिज्ञा च शिष्यबुद्धिसमाधानार्थम् ॥ लौकिकानामर्थपूर्वकत्वात् ॥ २ ॥ लोके विदि
ता लौकिकाः ॥ लौकिकाः ॥ लौकिकानां शब्दानामर्थपूर्वकत्वात्प्रयोजनपूर्वकत्वादस्मिं श्री
च्छास्त्रे नियमो न क्रियते ॥ कथं प्रयोजनपूर्वकत्वं ॥ कथं प्रयोजनपूर्वकानां शब्दानां नि ॥राम०
यमो न क्रियते ॥ आह ॥ देवदत्त गामभ्याज शुक्लां दण्डेनेति ॥ यस्य पुरुषस्य देवदत्तेकर्तृ

कागोत्वजात्युपलक्षिता शुक्लाद्रव्यकर्मिका दण्डकरणिकाभ्याजेति क्रियाभिप्रेता स ए
वैतद्वाक्यं ब्रवीति न सर्वः ॥ अतोऽर्थपूर्वकत्वं लौकिकानां शब्दानामर्थपूर्वकत्वे सति ॥
अर्थाभावे नोच्चारणं लौकिकानां शब्दानां छन्दसि पुनः रहरहः स्वाध्यायमधीयतेति श्रु
तिचोदनाप्रवृत्तः सदाकालं छन्दसामभ्यासः श्रुत्या विधीयते पुरुषस्याभ्युदयार्थमत
स्तद्विषयः स्वरसंस्कारयोर्नियम आरभ्यते न लौकिकानामर्थपूर्वकत्वात् ॥ न समत्वा
त् ॥ ३ ॥ नकारः प्रतिषेधवाची भयत्र संबध्यते काकाक्षिवत् नत्वेतद्यद्वैदिकानां स्व
रसंस्कारनियमोऽभ्युदयहेतुः किन्तर्हि लौकिकानामपि नियमोऽभ्युदयहेतुरेव कुतः
समत्वाच्छब्दानां य एव वैदिकास्त एव लौकिकास्त एव तेषामर्था इति अतो यद्वैदिकं वै
दिकानामेव स्वरसंस्कारकरणमभ्युदयहेतुरिति न तावत्तत्समत्वात् ॥ ॥ स्वा
ध्यायधर्मित्वाच्छन्दसि नियमः ४ अविद्याच्छन्दसि शब्दानां स्वरसंस्कारनियमाभ्यु

Indira Gandhi National
Centre for the Arts

प्रा० शा० २ दयायमह्नते॥ आम्नायधर्मित्वात्॥ आम्नायो वेदस्तस्य धर्मश्चाम्नायधर्मः॥ आम्नायधर्मो वि
द्यते यस्य शब्दग्रामस्य स आम्नायधर्मी॥ तस्य भाव आम्नायधर्मित्वं तस्मादाम्नायधर्मित्वा
च्छंदसि नियमो महोदयः॥ कुतमन्नदाम्नायधर्मित्वं नाम॥ आह॥ आम्नायः क्रियार्थोय
त्रार्थस्तद्यथा॥ ब्राह्मणं विध्यर्थवादरूपं मंत्रस्तु कर्मांगीभूतद्रव्यदेवतास्मारको मंत्रेण
स्मृतं कर्म कर्तव्यमिति नियमार्थवचनं॥ मंत्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भ
वति॥ अथ कर्मासमृद्धिर्न केवलं कर्मासमृद्धिः किं तर्हि॥ दुरिष्टहेतुकः प्रत्यवायः स्याद्
नाच्च॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह॥ स वाग्वज्रो यजमानं हि
नस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति॥ दुःप्रयुक्तमंत्रविषयो निंदार्थवादः॥ तथा स्वाध्याय ॐ
विशेषः फलार्थवादो भवति॥ घृतकुल्या मधुकुल्याः पितॄन्स्वधा अभिवहन्तीति॥ न तु लौ गमु० २
किकशब्दविषयमीदृक्किंचिदुपलभ्यते॥ अतः स्वरसंस्कारयोश्छंदसि नियमो महोदय

इति॥ यत्नत्र॥ ५॥ एवं स्वरसंस्कारौ छंदसि विषये च निज्ञातौ॥ छंदो विषयौ महाफलाविति
वथार्याधुना शब्दस्वरूपविजिज्ञापयिषयेदमाह यत्नत्र ज्ञायते शब्दस्य कारणभूतं तदपा
मद्दतिस्त्वत्रशेषः॥ ॥वायुः खात् ६॥ ॥ वायुः कारणभूतः शब्दस्य सर्वदाकाशाद्
त्पद्यते शब्दस्तत ७ शब्दस्तदात्मको वाय्वात्मक इत्यर्थः यदि वाय्वात्मकः शब्दो वायोः
सर्वगतत्वात्सर्वदा काले सर्वत्रोपलब्धिः प्राप्नोतीत्याशंक्याह॥ ॥सकरणैः ८॥ सम्य
क्करणैरुपहितो वायुर्वेणुशंखादिभिः शब्दीभवति॥ ॥ ससंघातादीन्वाक॥ ९॥ ॥यो
वायुः सम्यक्करणैरुपहितो वेणुशंखादिभिः शब्दीभवति स एव संघातादीन्प्राप्य वाग्भ
वति संघातः करणप्रयत्नः ससंघात आदौ येषां स्थानादीनां ते संघातादयस्तान्प्राप्य वा
ग्भवति वर्णो भवतीत्यर्थः॥ ॥ त्रीणि स्थानानि॥ १०॥ संघातकरणप्रयत्न इत्युक्त
म् अधुना संघातभूतानां यत्नो येषां स्थानादीनां तत्र त्रीणि स्थानानि वायोर्भवंति॥॥

Indira Gandhi National Centre for the Arts

प्रा० शा० देकरणो ॥११॥ ॥ देकरणे वायोर्भवतः संवृतविवृते ॥ शरीरात् ॥१२ येन एते करणे संवृते
यानि च त्रीणि स्थानानि शरीराद्वायोर्निर्गच्छतस्तानि भवंति ॥ यानि पुरस्तादुपदिष्टानि उरःप्रभृति
स्थानि करणमितानि मुखस्थानानि ॥ अत एवमाह शरीरादिति ॥ शरीरम् ॥ ॥ एवमनेन
प्रकारेण शरीराद्वायुर्निर्गच्छन् ककारादिवर्णविशेषं व्यक्तिशरीरमापद्यते ॥ शरीरके ॥ ॥
१४॥ शरीराद्वायुर्निर्गच्छन्मात्रावर्णविशेषव्यक्तिशरीरमापद्यते ॥ नेत्याह ॥ शरीरशरीरकं स्वरव्यंजनोटं वायुस्तालवादिषु स्थानेषु निःसृतो निष्पन्नः करणेन विशेषव्यक्तिनिरूपितवर्णत्वमापद्यते ॥ तेषां समुदयं त्रैकाल्यम् ॥१५॥ तेषां स्थानकरणप्रयत्नानां संबंधिनः समूहात् समुदयनात् उत्पन्नं त्रैकाल्यमभिधीयते ॥ त्रयः कालाः समाहृताः त्रिकालं
त्रिकालमेव त्रैकाल्यं स्वार्थे ष्यञ् ॥ त्रैकाल्यसंबद्धमर्थजातं भवद्भूतभविष्यत्संबद्धमर्थजा राम० २
तं वायुर्वर्णीभूतः पदवाक्यैरभिधीयते ॥ त्रिकालसंबद्धस्यार्थजातस्य वायुः शब्दरूपेण प्रका

शो भवतीत्यर्थः ॥ वायोरियं विभूतिर्या त्रयीविद्येति ॥ ओं रम् १६ ॥ यत्र तेत्येवमादिना
वायुः पदवाक्यरूपेण सर्वं प्रकाशयतीत्युक्तम् अथ तत्स्वाध्यायविधिरुच्यते ॥
ओंकारः स्वाध्यायादौ कर्तव्य इति सूत्रशेषः तथा चाह मनुः ब्राह्मणः प्रणवं कुर्यादा
दावन्ते च सर्वदा स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ओंकारात्प्रकारौ १७ ओंकारो
च्चारणं स्वाध्यायादौ प्रति ज्ञानमेवानुकूलफलोपयोगीति सूत्रार्थः यथा चोक्तं
ओंकारस्तथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभौ ओं
कारं वेदेषु १८ एवमथ तेन तत्र वेणोंकारायशब्दौ स्वाध्यायादावविशेषेणोच्चारणं
कुर्वाणेन तत्रैव स्वापयति ओंकारं वेदेषु प्रयुञ्जीतेति सूत्रशेषः अथकारम्भा
ष्येषु १९ भाष्यग्रंथेषु अथकारं प्रयुञ्जीतेति सूत्रशेषः इयतः २० इयतः श्रुतिकम्
च्यते श्रुतिरधीयीतेत्यर्थः श्रुतौ २१ विविक्तदेशेऽधीयीत एकैव द्वावेववक्त

Indira Gandhi National
Centre for the Arts

प्रा०
शा०
४

यत्नित्यमनध्यायो प्रयत्नतः॥ अध्यायभूमिं चाशुद्धां मात्मानं वाशुचिं द्विज इति॥ इष्टम्
२२॥ अभिरुचिरमासनमासीत॥ ऋतुं प्राप्य २३ हेमंतऋतुं प्रातश्चतुर्थे प्रहरे धीयी
त॥ योजनान्नपरम् २४ अधीयानो योजनान्न परमध्वानं गच्छेत॥ भोजनम्मधुरस्नि
ग्धम्॥२५ मधुरसप्रायं घृतप्रायं चान्नं भुंजीत॥ वर्णदोषविवेकार्थम्॥२६ अकाराद
यो वर्णास्तेषां दोषाः वर्णदोषाणां विवेचनाय॥ नानाकरणाय॥ तद्यथा॥ मात्रिकस्य स्व
रस्य द्विमात्रता॥ द्विमात्रस्य स्वरस्य मात्राकालता॥ अनुनासिकस्य स्वरस्यैकदेशता॥ यथा
महाँ२ इंद्र इति॥ तथा व्यंजनानामनेकप्रकारा दोषाः संभवंति॥ अयमपि वक्ष्यति॥ कृष्म
भ्यः पंचमेषु यमापत्तिर्दोष इति॥ तिङ्कृत्तद्धितचतुष्टयसमासाः शब्दमयम्॥२७ यत्किंचि
च्छब्दमयमुपलभ्यते तथी लक्षणेन तिङ्कृत्तद्धितचतुष्टयसमासाः॥ तिङ्॥ आख्यातकं भवंति राम० ४
पंचति पचतीत्येवमादीनि॥ कृत॥ कर्ता कारक इत्येवमादीनि॥ तद्धिताः आग्नेयः सारस्वती

इत्येवमादयः चतुःप्रकाराः समासाः॥ अव्ययीभावतत्पुरुषद्वंद्वबहुव्रीहयः॥ अव्ययी
भावो यथा समंभूमि उपरिनाभि तत्पुरुषो भवति प्रजापतिः वृत्रहा द्वंद्वो भव
ति इंद्राग्नी मित्रावरुणौ बहुव्रीहिर्भवति शुद्धवालः सर्वशुद्धवालः तां वाचमोका
रं प्रशाम: २८ तिङ्कृत्तद्धितचतुष्टयसमासलक्षणान्नामिमां भूतां वाचमोंकारं प्रशाम:
ओंकारो वाचः शुद्धः अष्टधः सम्यगध्यायादौ उच्चारणेन स्वस्मात् रमयंतो ग्रंथतश्च कथ
यिष्यति अतः स्वाध्यायादौ ओंकारः कार्यः द्विकर्मा च प्रच्छति धातुर्वर्ततेवाक्शब्दे ओंकार
शब्दे च द्वितीया माणवकं पृच्छतीति यथा अथ शिक्षाविहिताः २९ अथोत्पत्त्यं शब्दो वि
ज्ञेयाधिकारार्थः शिक्षाविहिताः स्थानकरणप्रयत्नादयो धिक्रियन्ते अतः परमधि
कारद्वयानुवृत्तिर्द्रष्टव्या स्वरसंस्कारानुवृत्तिः शिक्षाविहितानुवृत्तिश्च सवनक्रमेण
रः कालभूमध्यानि ३० अथ तानि उक्तसंख्यातानि द्व्याविप्यासया त्रीणि स्थानानि॥

Indira Gandhi National
Centre for the Arts

प्रा० शा० ५

नत्युक्तमानितानीत्युक्तं॥ इह तु शिक्षाप्रक्रमात्पर्याये नोच्यते॥ सवनक्रमेणोर
स्कंठभ्रूमध्यानि॥ प्रातःसवनमाध्यंदिनतृतीयसवनक्रमेणोरःकंठभ्रूमध्यानि त्रीणि
स्थानानि वायोर्भवन्ति॥ आयाममार्दवाभिघाताः ३१ एवमेतेषु वर्णेषूच्चार्यमाणेषु वि
काराः शरीरस्य पर्यायेण भवंति॥ आयाममार्दवाभिघाता॥ आयामस्तूर्द्ध्वगमनं शरीर
स्य मार्दवमधोगमनं गात्राणां॥ अभिघातस्तिर्यग्गमनं गात्राणां॥ उच्चनीचविशेषः ३२
योयत्नामाभिघातः स उच्चनीचविशेषः अयमुच्चनीचाभ्यामभिनिर्वर्त्यते॥ एवं शरीरप्र
यत्नेन येन निर्वर्त्यते तेषामुपरिष्टात्संज्ञां वक्ष्यति॥ उच्चैरुदात्त इत्येवमादिना॥ अथा
ख्याः समाम्नायाधिकाः प्राग्रिफितात् ३३ अथशब्दो मंगलार्थः॥ आख्याः संज्ञाः समा
म्नायाधिकाः वर्णसमाम्नायं वक्ष्यति॥ अथातो वर्णसमाम्नायं व्याख्यास्याम इति त ५
स्मादधिकाः प्राग्रिफितात्॥ रिफत्वं शब्दं नाम्ना वक्ष्यति॥ विसर्जनीयो रिफित

इति॥ तस्मात्प्रागुपलक्षणार्थमेतत्॥ परिभाषाप्यत्र भविष्यति॥ तद्यथा॥ ह्रस्वग्र
हे दीर्घप्लुतौ प्रतीयात् प्रथमग्रहणे वर्गमिति उपदिष्टात् वर्णाः वर्णसमाम्नाये कथि
तास्तद्यथा किति खिति गिति घिति ङिति कवर्गः अथ य पदे शुद्दिष्टा वर्णास्त एव प्रत्ये
तव्याः अन्यद्वचनाद्भविष्यति तद्यथा दुघेचा इत्यत्र संहितायामपि न वर्णान्यत्वम्
वचनात्संहितायां विकारा भविष्यंति तांस्तत्रैव वक्ष्यामः अथ वा पदेषु संख्योपदिष्टा
वर्णाः कार्तव्याः तद्यथाः इषत्रिवर्णम्पदं वाचतुर्वर्णम्पदं ऊर्ज्जे पंचवर्णम्पदं उक्तं
च स्वरेतवर्णोक्षरस्माघातत्त्वयोगार्थ एव मंत्रजिज्ञासमानेन वेदितव्यं पदे पदे
अस्माद्वर्णात्पूर्वं तथा ३४ अंते भवोन्त्यो वर्णः अकारादिः अस्माद्वर्णात्पूर्वं उपधासं
ज्ञकः संज्ञाकरणप्रयोजनं वक्ष्यति अननुनासिकमुपधा प्रागं तस्थायाः इति कि
ङ्कुङ्ङितिना ३५ वर्णाकारनिर्देशः इतिना भवति तद्यथा किति खिति गिति घिति

Indira Gandhi National
Centre for the Arts

प्रा०
शा०
६

ङ इति कवर्ग इति॥ कारेण च॥ ३६ कारप्रत्ययेन च वर्णनाम्निर्देशो भवति॥ तद्यथा यका
राकारयोर्ज्ञास्यते यद् इति॥ अव्यवहितेन व्यंजनस्य ३७॥ अकारव्यवहितेन कारप्र
त्ययेन व्यंजनस्य निर्देशो भवति॥ तद्यथा ककारपरयोः सकार इति॥ व्यंजनस्येति किं
अकार इकार उकार इति॥ रेफेण च ३८ इः रेफस्य रेफेण च निर्देशो भवति॥ तद्यथा रेफ
स्वरपरो॥ वर्णाद्यावितिनाच॥ तद्यथा॥ चिति रिति लिति चिति॥ स्वरैरपि ३९ स्वरैरपि व्यं
जनानां निर्देशो भवति॥ तद्यथा॥ नश्वच्छयोः शुमिति ५ नानुस्वारयमविसर्जनीय
जिह्वामूलीयोपध्मानीयाः॥ तथा च वक्ष्यति॥ अं इत्यनुस्वारः॥ तथा कं खं गं घं इति
यमा॥ तथा अः इति विसर्जनीय तथा ᳵक इति जिह्वामूलीय॥ तथा ᳶप इत्युपध्मानी
य॥ इतेकारप्रत्ययेन न निर्देष्टव्याः तद्यथा॥ अनुस्वारः शेषास्तु मकार इति॥ स्वरा
नैव निर्देश्याः ४० तथा ऊष्मभ्यः पंचमपदामापत्तिर्दोष इति॥ यमस्य स्वराद्दे नैवोपादा ६

नं॥ तथा विसर्ज्जनीयस्य विसर्ज्जनीय इति तथा जिह्वामूलीयोपध्मानीयो भवति॥ जि
ह्वामूलीयोपध्मानीयौ शाकटायन इति दंत्यमूर्द्धन्यापत्तिर्नतिः ४२ दंत्यस्य मूर्द्धन्यभावो
नतिरुच्यते तद्यथा परिसिंचति परिषिंचति संज्ञाकरणप्रयोजनं स्विति॥ [illegible]
स्यादि समानस्थानकरणास्यप्रयत्नाः सवर्णाः ४३ समानमेकस्थानकरणमास्यप्रय
त्नश्च यस्य स एवमुच्यते यस्य वर्णस्य समानः स्थानः समानः करणः समानश्चास्यप्रय
त्नः स तस्य सवर्णसंज्ञो भवति तद्यथा [illegible] [illegible] तवर्गं तवायं सुनि
इव स्विदीव अभिद्धतां अभीन्धतां अनरङ्गेहं अनुद्गेषं अनुतज्ञायतां [illegible]
ज्ञायतां ऋकारऌकारयोः सवर्णदीर्घत्वमेव भवति यथोदाहरणं छंदसि [illegible]
संज्ञाकरणप्रयोजनं सिसवर्णदीर्घ इति [illegible] ४४ वर्णसमा[illegible]
यस्यादावन्तु नासिकान्तस्य संज्ञा भवति अष्टानिति विभक्तिव्यत्ययेन षष्ठीविकृव वन

Indira Gandhi National
Centre for the Arts

प्रा० शा० ७

इष्टव्यं॥ स्वराणामिति सामानाधिकरण्यात्॥ यथा॥ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वर्णसमाम्ना
ये त्रिमात्रा अपि वक्ष्यन्ते॥ इह तु तेषां ग्रहणं न भवति प्रयोजनाभावात्॥ त्रिमात्रा हि स्वयमे
व वक्ष्यति॥ सर्वमग्ना३इ लाजी३ इ च्छाचीनिति त्रिमात्राणि चेत्यादिना॥ सवर्णदीर्घत्वं सम
ज्ञाकरणे प्रयोजनं॥ न च सवर्णदीर्घत्वमुक्तानां प्लुतानां च संभवति॥ अतो न गृह्यन्ते॥ संज्ञा
करणे प्रयोजनं सिसवर्णे दीर्घमिति॥ संध्यक्षरं परं॥ ७७॥ स्वराणामित्यनुवर्तते॥ स्वराणां
यत्पूर्वं सि मि तिर्संज्ञा कृता ततः परं यदक्षरं एकारादि ए ऐ ओ औ तत्संध्यक्षरसंज्ञं भवति।
संध्यक्षरमिति जातावेकवचनं॥ पञ्चोयवइति यथा॥ संध्यक्षराणि पराणीत्यर्थः॥
तानि चत्वारि द्विमात्राणि गृह्यन्ते न प्लुतान्यपि प्रयोजनाभावात् प्रयोजनार्थं संज्ञापरि
भाषाः क्रियन्ते॥ अतो द्विमात्राण्येव गृह्यन्ते न सर्वाणीति॥ वर्णसमाम्नाये तु सर्वेषां च वर्णानां
पाठो युक्तरूप एव॥ तत्र हि एतावन्तो वर्णाः संभवन्तीति त्येतदेव स्थाप्यते॥ अतस्तत्र स ७

सर्वेषां पाठो युक्तरूप एवेत्यदोषः॥ इह तु कार्यवन्त एवोपदिश्यन्ते॥ तद्यथा॥ एतेषां संज्ञा
याः प्रयोजनं संध्यक्षरमयवायावमिति॥ अकारादीनां भावी॥ ७५॥ स्वराणामित्येव कं।
ह्या कांश्चाकारश्च कं वर्जिताः स्वरा भाविसंज्ञा भवन्ति तद्यथा इ ई उ ऊ ऋ ॠ ऌ ॡ
ए ऐ ओ औ संज्ञाकरणे प्रयोजनं वक्ष्यति भाव्युपधस्यादि द्विसर्जनीय इति व्यंजनं
कादि ७८ ककारादिवर्णजातं तद्व्यंजनसंज्ञं भवति कितिखितिगितिघितिङित्या
दि ग्रं इत्यनुस्वार इत्येवमन्तं संज्ञाकरणे प्रयोजनं व्यंजनमर्द्धमात्रमित्यादि अनन्त
रः संयोगः ७० अनन्तरमव्यवहितं व्यंजनं व्यंजनेन सह संयोगसंज्ञं भवति तद्यथा
पक्ता क्तिनिक्तितिविति अश्वः शितिशितिविति संज्ञाकरणे प्रयोजनं वक्ष्यति स्वरा
त्संयोगादिर्द्विर्भवत्वात सर्वत्रेति स्पर्शाश्च वसरूध्या ७८ ककारादयः पञ्चकाः व
र्गाः समाम्नाये स्पर्शसंज्ञा न कार्या तेषु वर्गेषु संख्याज्ञानत्यावक्ष्यति असंख्याने सति हि

Indira Gandhi National Centre for the Arts

त्रा०
रा०
८

तीयंश्रोनकस्या॥ पंचमेपंचममितिच:॥१४॥ परिभाषासूत्रमेतत्॥ द्वौद्वौप्रथमौजित् ५१
स्पर्शेष्वेवसंख्येतिपरिभाषितमेवा॥ तत्तस्या: परिभाषाया इहोपस्थानं द्वौद्वौप्रथमौ
वर्णौवर्गेजित्संज्ञकौवेदितव्यौ॥ तद्यथा॥ कख॥ चछ॥ टठ॥ तथा॥ पफा संज्ञाकरणेप्र
योजनं॥ लुङ्ग्रहिजित्परइति॥ ऊष्माणश्चहवर्जम्॥ ५१॥ ऊष्माणश्चजित्संज्ञाभवंति ह
कारंवर्जयित्वा॥ तद्यथा शषसा: वशाद्वौद्वौप्रथमौवर्गेवर्गे॥ कख॥ चछ॥ टठ॥ तथ
पफा एतेत्रयोदशवर्णाजित्संज्ञावेदितव्या:॥ मुच्च॥ ५२ मुत्संज्ञका: शषसा भवंतिच
शद्वाज्जित्संज्ञाश्च॥ शषसेष्वेवमुत्संज्ञास्यादितिपृथग्योगकरणात्संज्ञाया: प्रयोजनं
लुङ्मुहिजित्परइति विशेष:॥ ५३॥ कृतसंज्ञेतरवचन: शेषश्च: शेषोयोवर्णराशि: स
विसंज्ञोभवति॥ तद्यथा॥ वर्गाणामुत्तमत्रयसद्योयरलवहकारश्चेतेविंशतिवर्णावि
संज्ञाभवति॥ संज्ञाकरणेप्रयोजनं॥ रेफविसर्जनीयावितिद्वितीयचतुर्था: सोष्माण: ८

५४॥ द्वितीया: खछठथफाश्चतुर्थाघझढधभ एतेदशवर्णा: सोष्माणसंज्ञाभवन्ति
इहयासांसंज्ञानांशास्त्रेसंव्यवहारेनोपलभ्यतेपूर्वाचार्यसंज्ञास्तावेदितव्या: शि
ष्यसंव्यवहारार्था: शिष्याश्चाभिर्व्यवहरेयुरितिपूर्वाचार्यसंज्ञानकथनमस्मिञ्छास्त्रे
मंगलार्थंपूर्वाचार्यशास्त्रकर्तृपरिणामार्थंवा यद्वायद्यापतेवर्णानित्याएवमेता
अपिसंज्ञानित्याएव एवंकृत्वासर्वशास्त्रेणतापवसंज्ञाउपलभ्यन्ते द्वितीयचतुर्थयो:
सोष्माण: तथाककारादीनांस्पर्शसंज्ञा तथायकारादीनामन्तस्थासंज्ञा अताभि:
संज्ञाभिर्व्यवहारतांधर्मोभवति यद्वा नेवेयंसंज्ञा किंतर्हि वर्णस्वरूपमनेनमते
णकथ्यते ऊष्मावायु: सहऊष्मणावर्ततइतिसोष्माण: अतिशयेनोर्ध्ववर्ते म
हाप्राणइत्यर्थ: अतएषांसंयोगपीडनेवायुर्निर्गच्छतिचनिर्गाच्छयेत यथादह:
दकारोधकारप्रकृतिर्यमोनकारइतिसंयोगस्तत्र धकारप्रकृतित्वाद्यमऊष्मा

Indira Gandhi National
Centre for the Arts

श्री॥

ॐ निष्क्रामति तं संधारयेत्॥ स्त्राद्धौ ककारो थकार प्रकृतिर्यमो नकार इ
प्रा ति संयोगाः॥ तत्र थकार प्रकृतिः त्वाद्य मस्य सपीडने कृष्मा निष्क्रामति॥ तं
शि संधारयेत् तदात्मकत्वात् तस्य वर्णस्य वार्यो पि॥ यमस्य स्फोटने दोषं वक्ष्यति
कृष्मभ्यः पंचमे भुयमापत्तिर्दोषः॥ स्फोटनं च ककारं वर्गो वा स्पर्शो इति॥ अ
मात्रः स्वरो ह्रस्वः॥५५ अकारमात्रः स्वरो ह्रस्वसंज्ञो भवति॥ तद्यथा॥ अ इ उ
ऋ लृ इति॥ संज्ञाकरणे प्रयोजनं वक्ष्यति॥ अतस्वारो ह्रस्वपूर्वो ह्यर्द्धमात्रे
ति॥ मात्रा च॥५६ मात्रा च यत्र श्रूयते तत्र अकारमात्रः स्वरः प्रत्येतव्यः ह्रस्वो
मात्रेति पर्याया वित्यर्थः॥ द्विस्तावान्दीर्घः॥५७॥ ह्रस्वद्विगुणकालो वर्णो दी
र्घसंज्ञो भवति॥ तद्यथा॥ आ ई ऊ ॠ ॡ ए ऐ ओ औ इति संज्ञाकरणे प्रयोजनं ६
दीर्घादर्द्धमात्रा पूर्वी वाह्य द्वेति॥ प्लुतस्त्रिः॥५८॥ ह्रस्वत्रिगुणकालः प्लुतसं

ज्ञो भवति॥ तद्यथा॥ आ ३ ई ३ ऊ ३ ॠ ३ ॡ ३ ए ३ ऐ ३ ओ ३ औ ३ इति संज्ञाकरणे प्रयो
जनं प्लुतमिति ताविष्टत्वादि व्यंजनमर्द्धमात्रा ५९ कादीनां व्यंजनसंज्ञा कृता
व्यंजनं कादीति अ[illegible] धुना तस्यार्द्धमात्राकालतो च्यते तद्य
था प्राङ् प्रत्यङ् ङकारा वर्द्धमात्रौ तदर्द्धमणु ६० अर्द्धमात्रार्द्धमणुसंज्ञं भ
वति संज्ञाकरणे प्रयोजनं मात्रार्द्धमात्राणुमात्रा वर्णपल्लीनामिति परमा
णवर्द्धाणुमात्रा ६१ अर्द्धाणुमात्रा परमाणुर्भवति २ स्थानं ६२ अधिकारो व
र्णानां स्थानशब्दे नोच्यते यदितऊर्द्धमनुक्रमनिधानः स्थानइत्येतदहितव्यं
अधिकारस्तत्र मेतत् ह्रस्वग्रहणाद्दीर्घप्लुतोप्रतीयात् ६३ ह्रस्वस्य वर्णग्रहणे
ग्रणादीर्घप्लुतावपि वर्णो गृहीतौ द्रष्टव्यौ परिभाषेयं स्थानाधिकारार्थो प्रय
मग्रहणा वर्गान् ६४ प्रथमवर्णग्रहणा वर्गप्रतीयात् परिभाषेयं ऋकोनि

Indira Gandhi National
Centre for the Arts

ॐ प्रा शा १०

ह्वामूलो॥१५॥ऋऋॠ ऌ त्रयः जिह्वामूलीयः कवर्गश्चेत्येतेनववर्णाजिह्वामूलस्था
नाः॥इचशेयास्तालौ १६॥इईई३त्रयः चवर्गः शकारएकारयकार एत्येतेएकादशवर्णा
स्तालुस्थानाः॥षटौमूर्द्धनि १७॥षकारष्टवर्गइत्येतेषड्वर्णामूर्द्धन्याद्रष्टव्याः रो
दन्तमूलो॥१८ रेफोदन्तमूलस्थानःप्रत्येतव्यः॥लृलसतादन्ते १९॥ऌॡॡ३ एतेत्र
योलकारःसकारस्तवर्गइत्येतेदशवर्णादन्तस्थानाः उवोपोपध्मायौष्ठौ॥२०
उऊऊ३ एतेत्रयोवकारउकारउपध्मानीयःपवर्गइत्येतेएकादशवर्णाओष्ठ्याः
अःविसर्जनीयाः कंठे २१॥अआआ३ त्रिमात्रिकइत्येतेत्रयोहकार विसर्जनी
योइत्येतेपंचवर्णाःकंठ्याः॥सवर्णवत्व॥२२॥अःइतिविसर्जनीयाः॥कंठइतिअ
कारमात्रस्यमात्रिकस्यद्विमात्रिकस्यत्रिमात्रिकस्यकंठस्थानताउक्तातथाकंठ्या १०
नध्येनेतिसमानकरणतात्रयाणामपि॥आस्यप्रयत्नस्त्वभिधते॥कोसावास्य

प्रयत्नोनामसंवृतताविवृतताच अस्पृष्टताईषत्स्पृष्टताच तद्यथा संवृतास्यप्रय
त्नोऽकारः विवृतास्यप्रयत्नाइतरेस्वराः तथा अस्पृष्टतास्यप्रयत्नःस्वराः॥तथा
स्पृष्टतास्यप्रयत्नाःस्वराः तथास्पृष्टतास्यप्रयत्नःस्वराः तथास्पृष्टतास्यप्रयत्नाः
स्वराः तथास्पृष्टतास्यप्रयत्नाःस्पर्शातथा ईषत्स्पृष्टतास्यप्रयत्नाअन्तस्थाः अर्द्ध
स्पृष्टास्यप्रयत्नाऊष्माणोनुस्वारश्च अयमास्यप्रयत्नेःभिन्नाविद्धिकल्का इहहल्य
ते अतोऽकारस्यमात्रिकस्यसंवृतास्यप्रयत्नस्येतरयोश्चविवृतास्यप्रयत्नयोःसाव
र्ण्यन्नत्वंभवतीति तदर्थमिदमारभ्यतेसवर्णवत्वकार्यंभवतिसवर्णदीर्घोभ
वतीत्यर्थः तद्यथासोमा आभूयोभरसोमाभूयोभरमावाअग्निः मावाग्निःए
वमन्यत्रापिसवर्णवत्कार्यंद्रष्टव्यं ऐकारौकारयोः कंठ्यापूर्वामात्रातालव्यो
ष्ठ्ययोरुत्तरा २३ ऐकारस्यऔकारस्यचकंठ्यापूर्वामात्राअकारमात्राभयोरपि

Indira Gandhi National
Centre for the Arts

ओं
प्रा
शा
११

पूर्वी॥ उत्तराप्रथमस्य तालुस्थाना॥ उत्तराप्रथमस्य एकार इत्यर्थः॥ तद्यथा॥ अ ए
ऐ इति॥ द्वितीयस्योत्तरा ओष्ठस्थाना॥ द्वितीयस्योत्तरा ओकार इत्यर्थः॥ तद्यथा अ उ
औ इति॥ अत्र केचिदाहुः॥ अकारस्यार्द्धमात्रा एकारस्याध्यर्द्धा ऐकारो॥ अकारस्या
र्द्धमात्रा ओंकारस्याध्यर्द्धा औकार इति॥ तथा चोक्तं॥ अर्द्धमात्रा तु कंठ्यस्य एकारौकार
योर्भवेदिति॥ यमानुस्वारनासिक्या नासिक्यः ७४ चत्वारो यमा अनुस्वार नासि
क्यो चैते षड्वर्णा नासिकास्थाना इति॥ मुखनासिकाकरणोनुनासिकः॥ ७५
मुखसहितया नासिकया क्रियते इति मुखनासिकाकरणो मुखनासिकाक
रणो वर्णोनुनासिकसंज्ञो भवति जातावेकवचनं॥ स्वराणामयं वैकल्पिको
धर्मोन्तस्थानां वरेफवर्जितानां वनित्यश्चायं धर्मस्तद्यथा॥ अनुनासिकमुपधा ११
प्रागंतस्थाया॥ यथा मह्रौ २ इंद्रः उत्तयामि स्वा २ अर्हं येवा वनस्पतींरनु

अग्ने कया क्रतस्तु॥ अन्तस्था तु भवति॥ अन्तस्थामन्तस्त्वनुनासिकां परमस्थानां
सयौंमि संयामि तःह्लोकं पुण्यप्रलेप्नमिति॥ इत उत्तरं करणाधिकारो भवि
ष्यति दंत्या जिह्वाग्रकरणाः ७२ दंत्यवर्णा जिह्वाग्रेण क्रियंते तद्यथा तथे
तिरश्च ७७ रेफो जिह्वाग्रेण क्रियते अन्तस्थानोपि र मूर्द्धन्याः प्रतिवेष्ट्या
ग्रम् ७८ षकारटवर्गौ एतौ प्रतिवेष्ट्य जिह्वाग्रेण क्रियते तालव्यानां मध्ये
७९ तालुस्थाना वशया एते जिह्वामध्येन क्रियंते समानकरणा नासिक्यौष्ठ्याः
८० हिंकारो नासिक्यः स च नासिकास्थानः उवो पोपध्मानं ष्ठ इति उष्ठस्था
ना एतेषां यदेव स्थानं तदेव करणम् वो दंत्योष्ठ्यः ८१ वकारस्तु ओष्ठ्यो दंताग्रैः क्रि
यते नासिकामूलेन यमाः ८२ यमाश्चत्वारो नासिकामूलेन क्रियते यथा
यज्ञो याज्ञा क्नक्न इति जिह्वामूलीयानुस्वारादनुमूलेन ८३ जिह्वामूलीया

Indira Gandhi National
Centre for the Arts

ऋक्षो जिह्वामूले इति अनुस्वारस्य एते हनुमूलेन क्रियते॥ यथा तक्वा मयोः
प्रा अइं श्रुनातोः कं वा मध्येन॥ ८४ कं गा वर्णा हनुमध्येन क्रियन्ते॥ यथा अहइति
शा प्रथमोन्तमा पदान्तीया अवसनौ॥ ८५ एवन्ता वदधस्तनेनग्रंथेन वर्णानां स्थाना
१२ निकारणानि चोक्तानि आस्य प्रयत्नश्च शिक्षान्तराकृत्य तेसवर्णसंज्ञायामं
गभूतत्वात॥ अधुना पदान्तीयवर्णनिरूपणाय ब्राह प्रथमोन्तमाः पदान्तीया
भवन्ति॥ वकारञकारौ वर्जयित्वा॥ प्रथमा भवन्ति यथा॥ प्राक् अपाक् विरा
ट सम्राट्॥ यत् तत् त्रिष्टुप् अनुष्टुप्॥ उत्तमा भवंति यथा प्राङ्॥ प्रत्यङ् चीन्
समुद्रान् तम्॥ यज्ञम्॥ विसर्ज्जनीयः ८६ विसर्ज्जनीयः पदान्तो भवति यथा
अग्निः धर्म्मः स्वराश्च ऌकारवर्ज्जाम् ८७ स्वराश्च पदान्तीया भवति॥ ऌका १२
रं वर्ज्जयित्वा॥ तद्यथा हीप्राय नीप्राय॥ अश्विना मित्रावरुणा॥ त्वावि।

इंद्राग्नी। मधु। अनु। वृषण्वसू हे। विरूपे। पृथिव्यै। इंद्रो। अश्विनौ॥ स्वरान्ताना
मेतान्युदाहरणानि णकारश्चोरावग्रहे ८८ णकारः पदान्तीयः प्राप्तः॥
प्रथमोन्तमाः पदान्तीया इति ऋऋकारश्च स्वराश्च ऌकारवर्ज्जमिति प्राप्तः
अनन्तात्तु ओपदान्तीया वा पद्यते अवग्रहे एवमस्याप्येते यथा णकारस्य भव
ति पूषणवान् वृषणवस्व इति मकारस्य भवति पितृ सदनाः पितृम
न्तं अनुनासिका अन्तमाः ८९ वर्गोन्तमा ङञणनमा अनुनासिका भवति
व शाद्वान्त स्थाना दपरित्याग द्वारेण नासिकास्थानं द्वितीयमेषामित्यर्थः व
णस्वरूपत्वापनार्थं निर्दं संज्ञान्तरमित्यपरे स्पर्शान्तस्य स्थानकरणविमोक्षः
९० स्पर्शान्तस्य पदस्य स्थानकरणयोः परित्यागः कर्त्तव्यः अनेन प्रत्यत्नेनान्य
त्पदमारब्धव्यं अन्यथा पदद्वैर्द्वित्वं भवति तद्यथा तत् नः तन्नो मित्रः सम् यो

Indira Gandhi National
Centre for the Arts

प्रा० मिसयोमीद्वमग्नेः॥ अवसानेच ९०॥ समाप्तौवाईबोदेःस्वरान्नानामपिपदानान्तस्था
सू० नकरणविमोक्षःकर्तव्यः॥ यथासम्मधुमतीर्मधुमतीभिःपृच्यंताम्॥ शुक्रंउदकेः
१३ अद्भयः॥ प्रगृह्यम् ९२ प्रगृह्यमित्ययमधिकारःयदितऊर्द्धमनुक्रमिष्यामःप्रगृ
ह्यसंज्ञंतद्वेदितव्यं॥ अधिकारसूत्रमेतत्॥ प्रगृह्यसंज्ञायाःप्रयोजनं॥ प्रगृह्यद्
स्वरइत्यादि॥ एकारेकारोकारद्विवचनान्ताः॥ ९३ एकारईकारऊकारएतेद्विवच
नप्रतिपादकाःसन्तःप्रगृह्यसंज्ञाभवन्ति॥ यथा॥ एकारान्तस्यभवति॥ द्वेइति श्री
र्वेइति॥ ईकारान्तस्यभवति॥ उर्वीइतिपृथ्वीइति॥ ऊकारान्तस्यभवति॥ अध्वर्यूइ
ति॥ बाहूइति॥ ओंकारश्चपदान्तेनवग्रहः॥ ९४ ओंकारश्चपदान्तेवर्त्तमानः॥ अव
ग्रहवर्ज्जितःप्रगृह्यसंज्ञोभवति॥ यथापदान्तेभवति॥ अध्वर्योइति॥ अध्वर्यो १३
अद्रिभिः॥ चित्रभानोइति॥ इंद्रायाहिचित्रभानोसुता॥ अनवग्रहइतिकिं गो

व्यक्तमितिगो॥ व्यक्तम् गाघातमितिगोघातं॥ उकारोऽपृक्तः॥ ९५ उकारःअपृक्तः
गृह्यसंज्ञोभवति उकारोपृक्तोदीर्घमनुनासिकमितिवक्ष्यति एतेनेत्यंरूपंभवति
यथा ऊंइति पन्थामन्वेतवाउ नवाउएतत् अपृक्तइतिकिं॥ उ॥ इन्द्र योजान्विं
इतेहरी वसूअस्मेव ९६ वसू अस्मे चेएतानिपदानिपदानिप्रगृह्यसंज्ञानि
भवंति यथावसूइतिवसू सोममिंद्रचमूसुतं अस्मेइत्यस्मे इंद्राअस्मेआगत
त्वेइतित्वेधुक्षेराय: मेउदात्तम् ९७ मेइत्येतत्पदंप्रगृह्यसंज्ञंभवतिउदात्तेवेद्व
ति यथा मेइतिमे मेरायोमा उदात्तमितिकिं इतम्मेवरुणश्रुति अमीपदम् ९८ अ
मीइत्येतत्पदंप्रगृह्यसंज्ञंभवति यथा अमीइत्यमी एषवोमीराजा येवामीरोचनेपद
दमितिकिं पदावयवस्यमाभूत् अमीषांचित्तंस्वरोन्तरम् ९९ स्वरोन्तरसंज्ञोभवति
यथाअइति उइति अन्तरसंज्ञायाःप्रयोजनं प्रागुवर्णदन्तानामेकीभावइति

Indira Gandhi National
Centre for the Arts

ॐ प्रा शा १७ वत्यति॥ तथा चोक्तं॥ सव्यंजनः सानुस्वारः शुद्धो वापि स्वरोत्तरमिति॥ सहाद्यैर्व्यंजनैः
१०० आद्यैर्व्यञ्जनैः सहितः स्वरोत्तरं प्रत्येतव्यः॥ यथा मो॥ ओंकारो मकारसहितोत्तरं
यथा॥ इडुकारो दकाररेफसहितोत्तरं॥ उत्तरैश्चावसितैः॥१०१ आद्यैर्व्यञ्जनैरुत्तरै
श्चावसानगतैः सहितः स्वरोत्तरम्॥ यथा वाक्॥ वकारककारसहित आकारोत्तरं
प्राङ् पकाररेफङकारसहित अकारोत्तरं॥ एवं तावदयमेकः स्वरो भवति॥ तस्मादधस्ता
नान्युपरितनानि च व्यंजनानि तदङ्गानि भवन्तीत्यतिपादितं॥ अधुना स्वरयोर्मध्ये द्वि
त्रिप्रभृतीनां व्यंजनानां अंगनिरूपणायाह संयोगादिः पूर्वस्य १०२॥ संयोगस्यादि
भूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति॥ यथा॥ अश्वः शकारो वकारश्च संयोगः॥ सं
योगादिः पूर्वस्येति कृत्वा एकाः शकारः पूर्वस्याङ्गं शकारवकारावुत्तरस्याङ्गं॥ तथा द १८
ह्यम्॥ द्वौ वकारो यकारश्च संयोगः॥ तत्रैको वकारः संयोगादिः पूर्वस्येति त्वा

पूर्वाङ्गं वकारयकारावुत्तराङ्गं॥ यमश्च १०३ यमश्च पूर्वस्याङ्गं भवति त्वशाह्वात्पूर्व
वर्णसहितः यथा रुक्मम् ककारद्वयमकारश्च संयोगः तत्र ककारयमो पूर्वस्य
मकारउत्तरस्य क्रमजंच १०४ पूर्वांगं क्रमाज्जातं क्रमजं यत्संयोगादेः परस्य व
र्णस्य द्विरुक्त्या जायते तत्क्रमजमित्युच्यते यथा पार्श्व्यम् रेफो द्वौ शकारो व
कारो वकारयकारश्च संयोगः तत्र रेफः संयोगादि क्रमजश्च पूर्वः शकार एतौ पूर्वां
ङ्गं द्वितीयशकारवकारो यकारश्चोत्तराङ्गं वर्ष्यं रेफो द्वौ षकारौ यकारश्च संयो
गः तत्र रेफः संयोगादिः षकारः पूर्वः क्रमजः एतौ पूर्वाङ्गं द्वितीयषकारो यका
रश्चोत्तराङ्गं तस्मादुत्तरस्य पूर्वो १०५ तस्मात्क्रमजाद्यदुत्तरं व्यंजनं तत्पूर्वाङ्गं भ
वति स्पर्शपरश्चेत् यथा पार्ष्ण्या रेफः षकारौ द्वौ णकारो यकारश्च संयोगः तत्र
रेफः संयोगादिरिति कृत्वा पूर्वाङ्गं तत्र पूर्वः षकारः क्रमजमिति कृत्वा पूर्वांगत

Indira Gandhi National
Centre for the Arts

उ°
प्रा°
शा°
१५

स्माच्चोत्तरः संयुक्त इति कृत्वा पूर्वो णकारः पूर्वाङ्गं॥ द्वितीयो णकारो यकारश्चोत्तरस्य
स्वरस्याङ्गम्॥ अवसितं च॥ १०६ अवसानगतं व्यंजनं पूर्वाङ्गं भवति यथा॥ वाक्
ककारो अवसितः ऊर्क् रेफककारावत्रावसितौ पूर्वस्य स्वरस्याङ्गं॥ पूर्वाङ्गपराङ्ग
विज्ञायाः प्रयोजनमाह॥ ॥व्यञ्जनं स्वरेण सस्वरम्॥ १०७ ॥व्यंजनं यद्यस्य
स्वराङ्गं तत्तेनैव समानस्वरं भवति॥ अथ तत्तान्येवोदाहरणानि॥ तथा चोक्तं॥ स्वर
उच्चः स्वरो नीचः स्वरः स्वरित एव च॥ स्वरप्रधानं त्रैस्वर्यं व्यंजनं तेन स्वरम्॥ अथ
शिक्षाविहिता इत्युपक्रम्योरः कण्ठभ्रूमध्यानि प्रातःसवनमाध्यंदिनतृतीयसवने
षु यथाक्रमं स्थानानि भवंतीत्येतत्प्रतिपादितं॥ अत एकैकस्मिन् स्थाने वर्णो पूर्वा
र्यमाणेषु त्रयो विकाराः शरीरस्य भवंति॥ ये पांपेणं ते पि प्रतिपादिता एव॥ आया १५
मः मार्दवाभिघाता इत्यनेन सूत्रेणाधुना तेषु शारीरविकारेषु मध्ये स्वरा निष्पद्य

न्ते तन्निरूपणायाह॥ उच्चैरुदात्तः॥ १०८॥ आयामेनोर्ध्वगमनेन गात्राणां यः स्वरो नि
ष्पद्यते स उदात्तसंज्ञो भवति यथा अग्नाइइ लाजी व व्हावी इव उदात्तप्रदे
श उदात्तवानुदात्त इत्येवमादयः नीचैरनुदात्तः १०९ नीचैर्मार्दवेनाधोगमनेन
गात्राणां यः स्वरो निष्पद्यते सोनुदात्तसंज्ञो भवति यथा इतः प्राकृतनस्पद्यत्पस्पो
दात्तताः ऋष्यनार्षेयपक्षयीणाम् अनुदात्तप्रदेशा उदात्तवानुदात्त ९ स्वरितसि
तिउभयवान् स्वरितः ११० उदात्तस्योर्ध्वगमनं गात्राणां प्रयत्नः अनुदात्तस्याधोग
मनं गात्राणां प्रयत्नः आभ्यां प्रयत्नाभ्यां समादारीभूताभ्यां यः स्वरो निष्पद्यते स
स्वरितसंज्ञो भवति यथा धान्यम् वेत्स्यो स्वः एकपदेनीच पूर्वः सयवोन्त्यः
१११ एकस्मिन्पदे नीच पूर्वो नुदात्त पूर्वो यकारेणा वकारेण संहिता जात्यः स्वरः प्र
त्येतव्यः नीच पूर्व इति संभवाद्विशेषणं यस्मात्पूर्वः कोपि वर्णो नास्ति तत्रापीत्य

प्रा घेः॥ अपूर्वोपिभवति॥ यथानीचपूर्वोभवति॥ कन्या:धान्यम्॥ अपूर्वोभवतिस्व:
शा उदात्तादयः परेसहास्वराःप्रत्येतव्याः॥ अभिनिहितश्चप्रश्लिष्टस्तैरोव्यंजनस्तैरो
१६ विरामपादवृत्तस्तथाभाव्याः॥ त्रयोनिस्वरपराः॥११२ त्रयोनीचस्वरपराः अभिनिहि
तश्चप्रश्लिष्टाः॥ एदोद्भ्यामकारोलुगभिनिहितः॥११३ एकारोकाराभ्यामुदात्ता
भ्यामकारोउदात्तोयत्रलुप्यतेतत्राभिनिहितःस्वरोभवति॥ एकारस्यभवति॥ ते
अप्सरसाम्॥ तेअवंत तेवंत्वस्मान्॥ ओंकारस्यभवतिवेदः अस्मि॥ वेदोस्मि
त्वयोस्मि॥ युवर्णौप्रत्ययौतेप्रः॥११४ इउवर्णौउदात्तावनुदात्तस्वराभ्यांयकारव
काराभ्यांयथासंख्येनयुक्तौयदातदातेप्रसंज्ञःस्वरोभवति॥ यथाइवर्णस्यभव
ति॥ त्रिअंबकं॥ त्र्यम्बकं॥ वाजीअर्वन् वाज्यर्वन्॥ उवर्णस्यभवति॥ योजानुइन्द्र
योजान्विंद्रतेतुअन्नः॥ इन्नः सर्पिरासुतिः॥ इवर्णस्तुभयतोह्रस्वःप्रश्लिष्टः॥११५ १६

ह्रस्वइकारःउदात्तःपरश्चह्रस्वइकारोनुदात्तस्तयोःप्रश्लेषेप्रश्लिष्टसंज्ञःस्वरो
भवति यथा अभिइंधताम् अभीधतामुखे स्रुचिइव स्रुचीवघृतं स्वरव्यंज
नयुतस्तैरोव्यंजनः ११६ उदात्तात्परोयःस्वरव्यंजनयुतःसतैरोव्यंजनसंज्ञ
कःस्वरोभवति यथा इडेरन्तेहव्ये काम्ये अवग्रहस्तैरोविरामः ११७
उदात्तादवग्रहस्तैरोविरामसंज्ञःस्वरोभवति अयंचपदेषुभवति अवग्रह
वचनात् अवग्रहाभावेतुतैरोव्यंजनएव यथा गोपताविति गोपतौ पश
पति मितियज्ञ पतिम् विवृत्तिलक्षणःपादवृत्तः ११८ स्वरयोरन्तरं विवृत्ति
रुच्यते विवृत्त्यालक्ष्यतइतिविवृत्तिलक्षणः विवृत्याव्यवहितइत्यर्थः सपा
दवृत्तसंज्ञःस्वरोभवति यथाध्रुव असदन् ध्रुवाअसदन् का ईम् काःईम
रे उदात्ताद्यन्तोन्यदवग्रहस्तथाभाव्यः ११९ उदात्तादिरुदात्तान्तोनीचावग्रहस्तथा

Indira Gandhi National
Centre for the Arts

प्रा॰
शा॰
१२

भाव्यसंज्ञः स्वरो भवति ॥ यथा ॥ तन् नप्त्र इति तन्नप्त्रे ॥ तनूनपादिति तनू नपात्
अयं तु स्वरितानां मध्ये पठितः ॥ नन्विह माध्यंदिनानां स्वरित उपलभ्यते ॥ उदात्तानुदा
त्तात् पृथग्भूताउपलभ्यते ॥ स्वरितश्चोदात्तानुदात्तानुदात्तयोरेकीभावे सति भवति ॥ तस्मि
न्संज्ञः स्वनिर्घोषमननं ॥ त्रावयवानां भवति ॥ न वा तदिह किंचिदुपलभ्यते ॥ अतो मा
ध्यंदिनानां पदकाले तथा भाव्यसंज्ञः कंपो भवति ॥ तथा चोक्तं ॥ औज्जिहायनकै
र्माध्यंदिनमतानुसारिभिः ॥ अवग्रहो यदा नीचउच्चयोर्मध्यतः क्वचित् ॥ तथा
भाव्यो भवेत्कंपस्तनूनप्त्रे निदर्शनम् ॥ यत्र तथा भाव्यस्य स्वरितमध्ये पाठः ॥ अ
यमन्येषामाचार्याणां मतेन तेहि मतनूनन शाद्भः स्वसंहितावद्भवति ॥ अ
तो सो स्वरितो भवति ॥ तदभिप्रायेण स्वरितानां मध्ये पाठः ॥ अयमपि चोपरि
ष्टाद्वक्ष्यति ॥ निहितमुदात्तस्वरितपरमनवग्रे स्वरितस्य चोत्तरो देशः ॥ इहन्य २

तद्दतिनदभिप्रायेण वक्ष्यति एवमुदात्तस्वरितलक्षणविधानानन्तरं हस्वलक्ष
णमाह हस्तेनते १२ अनेन प्रकारः प्रदर्श्यते तत्रोदात्ते ऊर्ध्वगमनं हस्तस्यानुदा
त्ते ऽधोगमनं एतत्सर्वेषामाचार्याणां मते स्थितं स्वरिते तु विप्रतिपद्यते तत्प्रकाशना
र्थमिदमाह चत्वारस्तिर्यग्स्वरिताः १३ जात्याभिनिहितक्षैप्रप्रश्लिष्टा एते स्वा
रतिर्यग्[illegible]कृत्वा साराणीयाः पित्युदात्तवद्धस्तं [illegible] अनुदात्तं चेत्पूर्वं तिर्य
क् ह्रस्तस्यैव स्य १४ एतेषां चतुर्णां जात्यादीनां यद्यनुदात्तं पूर्वं भवति तदा तिर्यग्
[illegible]मयित्वा स्वारयितव्याः अनेन उदात्तपूर्वे ऽप्रपूर्वे च भवति
यथानुदात्तपूर्वो भवति यथा चोदात्तपूर्वो भवति वैकल्पोपनन्यम् विलम्बेपामि
वेदासि स्वप्यन् योनानिंद्रं अभीष्वतामसि न्यवीवहृतं एते तु तिर्यग्ध्वस्तः
क्रियते उदात्तपूर्वे तु जात्यादिषु पूर्वेषु वर्तते तिर्यक् नव हस्तः क्रियते यथा उदात्त

Indira Gandhi National
Centre for the Arts

प्रा० पूर्वेषु भवति॥ पंचदशोध्यायः॥ कतिधा व्यकल्पयन्॥ अपूर्वस्य भवति॥ यथा॥ त्र्यम्बकं य
शा० जा॥ऋज्वित्रिहत्य प्रणिहन्यस्तउदात्ते।ऋज्विन्निहत्यहस्तमनुदात्तवत्।ततःप्रकर्षेण
१८ निहन्यत्नेवनीचीक्रियते नीचीक्रियते। मनुष्यदानवद्धस्तःक्रियतइत्यर्थः॥ जात्या
भिनिहितदेप्रप्रश्लिष्टाउदात्तेपरभूते। यथा॥ भूर्भुवः॥ स्वर्द्यौरिवास्मिवित्तः प्रसवो॥
श्विनोः यामद्विश्वन्यत्रिणां स्वधीवेति। उदात्तइतिकस्मात्॥ धान्यमसि॥ पवित्रेस्थोवै
स्नव्यौ॥ तीव्रणाभिनिहितः॥ परंपरमृदुत्वन्यः॥ तीव्रणोच्चारणतोहस्ततस्माभिनि
हितःस्वरोभवति। ततोन्योमृदुप्रयत्नोभवति। किमविशेषेणत्याह॥ परंपरंशब्दोव्य
य॥ पूर्वमपेत्यपरं परं पूर्वमपेत्य॥ परइत्येव॥ यथाभिनिहितमपेत्यपेत्येप्रः ते
प्रमपेत्यप्रश्लिष्टः॥ तेषेनात्यस्यान्नभावोद्रष्टव्यः॥ तथाचोक्तं सर्वतीव्रणाभिनि १८
हितःप्रश्लिष्टस्तदानंतरं॥ ततोमृदुतरोसारोजात्यस्तेप्राक्भोस्तैः॥ ततोमृदुतरः

सारस्तैरोव्यंजनतव्यते पादवृत्तोमृदुतरएतत्सारबलाबलम् तस्यादितउदात्तइ
स्वरार्द्धमात्रम् तस्यस्वरितस्यस्वरस्यादावुदात्तंज्ञातव्यम् तत्रस्वरार्द्धमात्राकालंय
द्येकमात्रोयदिद्विमात्रोयदित्रिमात्रोवा स्वरस्तथापिकृदमुदात्तंपरमनुदात्तंअयं
वस्वरितेउदात्तानुदात्तप्रतिविभागोद्रष्टव्यः स्वरितशब्दनेतदुदात्तानुदात्तनिर्वत्तो
पृथक् एकश्रुतिस्वरान्तरमभिधीयते यथात्रपुनारयोःसंयोगधात्वंतरस्यकास्य
स्योत्पत्तिः यथावगुडदध्नोरेकीभावजनितोत्पत्तिरिवमुदात्तानुदात्तसंयोगस्वरे
स्वरितोत्पत्तिः सप्तः सामस्वरसदास्वरानाद्धः षड्जर्षभगांधारमध्यमपंचधैम
वतनिषादान् नतुयजुर्वेदलक्षणप्रक्रमे एवमुदात्तानुदात्तसंयोगस्वरितो
त्पत्तोकःसामलक्षणप्रसंगः अमीदृष्टभावाएतायजुर्वेदेअध्ययोःसामगा
नंविदितंनान्योध्यायोगायेदिष्टकावाएवाइति अतोधर्युकर्तृकमितिक्लाक

Indira Gandhi National
Centre for the Arts

प्रा
शा
१९

ष्ठिलक्षणप्रस्ताव: कृत: साममन्त्राअपरेताकु:जात्याभिनिहितक्षैप्रश्लिष्टक्षैरो
व्यंजनतैरोविरामपादवृत्ता: स्वरा: अत्रा धिक्रियन्ते॥ताथाभाव्यस्तुवाजसनेयिना
न्निवार्यते॥ग्रीवा॥उदात्तानुदात्तस्वरितान् यजुर्वेदे स्वरास्त्रीनाकु:॥तेवोक्ता एवस
न्तोनूत्पद्यतेइदानीमपवादार्थम् द्वौ॥किमविशेषेणयजुर्वेदेत्रीन्स्वरानाकु नेत्यु
च्यंते द्वौस्वरावुदात्तानुदात्तौ॥भाषिकलक्षितौशतपथब्राह्मणेआकु:॥पारिशे
ष्यान्मंत्रेष्वत्रैस्वर्यम्॥एकमतानुलक्षणमेकंस्वरमाकु:॥यज्ञकर्म्मणि॥साम
जपंन्यूङ्खवर्ज्जप्रगीतंमंत्रवाक्यं सामशब्देनोच्यते॥विश्वेदेवा: शृणुतेतिजप:
न्यूङ्खोबहुन: प्रसिद्ध: एतानियज्ञकर्म्मणि वर्ज्जयित्वाएकस्वरोभवतितानलक्ष
ण:॥प्रावचनोवायजुषि॥प्रवचनेनार्षेय: पाठ॥उच्यते॥तत्रभव: स्वर प्रावचन: १९
सवायजुषिभवति॥वातानइतिविकल्प: सवत्रैस्वर्यलक्षणएवभवति तस्मि

न्निविकार:॥तस्मिन्नुक्तष्टिकसर्वनामिकाद्वितीयययायोनिर्द्दिश्यतेसविकार: प्र
त्येतव्य यथाअनुस्वार: रोम्वसुमकारइतिमकारोनुस्वारविकारमापद्यते भा
विष्य:सुष: समानमदेइतिसकारषकारविकारमापद्यतइत्यर्थ: तस्मिन्निति
निर्द्दिष्टेपूर्वस्यातस्मिन्निति संज्ञाम्पन्नेपरिपद्यतेसप्तमीनिर्द्दिष्टेपूर्वस्यपदान्तस्य
विधि प्रत्येतव्य: यथाककारपकारयो: समिति तथयो:समिति तस्मादित्यु
त्तरस्यादे: तस्मादितिपंचमीनिर्द्दिष्टात्परस्यकार्यंविदितव्यं पदादे: यथा
ओंकारात्तुयथा:परे:स्विते षष्ठीस्थानेयोगा षष्ठीविभक्ति:स्थानेयोगिनीवे
दितव्या: षष्ठ्यन्तस्यकार्यंवेदितव्यमित्यर्थ: यथायवयो:पदान्तयो:स्वरमध्ये
लोप: एकारौकारयो:कंवापूर्वामात्रातात्वोष्ठयोनतत्र तेनेत्यागत: तेनेनि
तृतीयाप्रह्रणंतृतीययायोनिर्द्दिश्यतेसआगम:प्रत्येय: यथा ओंकाभ्याम

Indira Gandhi National
Centre for the Arts

प्रा० कारइतिप्रगृह्यंचर्चायामितिनापदेषु॥अन्तरेणपर्वणी॥पर्वशब्देनपदमुच्यते
शा० पदयोर्मध्येआगमोभवतियथाप्राङ्सोमः॥प्राङ्ङ्सोमः॥प्रत्यङ्सोमः॥प्रत्यङ्ङ्सोमः
२० त्रीन्समुद्रान्॥त्रीन्त्समुद्रान्॥अस्मान्सीते॥अस्मान्त्सीते परएकस्मात् एकस्य
पदस्यआगमोविधीयतेसपरोभवति॥यन्पा द्वेइति॥शीर्षेइति प्रगृह्यचर्चा
यामितिनापदेष्वित्येनेकस्मात्पवात्परः अनार्षेयमियमितिकरणागमोविधी
यतइति॥उभयोर्विकारः॥द्वितीययानिर्दिष्टोविकारइत्यधत्ताडक्तं॥सउभयो
र्भवति अंतरेपर्वणीचपदान्तपदाद्योरित्यर्थः एकस्यवर्णस्यचयस्यनिर्दिश्यते
यथान्तरेणपर्वणीभवति आइदं एदम् इहउर्ज्जं इहोर्ज्जंदधात एकस्यवर्ण
स्यभवति॥मो॥म॥नः॥मोष्टुणइंद्रात्र॥स्वबाव सुषाव सोषाव सोमम्॥ २०
वर्णस्यादर्शनंलोपः दर्शिरुपलब्धिरदर्शनंवर्णस्यलोपइत्युच्यते वक्ष्यति

लोप ऽस्वरयो यथा अयत्मा मा अयत्मा वावसेनः सत्याःनःसत्यानः
संवाशिषः विकारीयथासन्नम् विकारोस्यास्तीतिविकारी विकारीवर्णोऽव
वनेयथासन्नेयोयद्दामन्नस्तन्नमापद्यते वक्ष्यति स्वरेभावन्नस्याम् यथा॥त्रि
अम्बकं त्र्यंबकं ड्ड। थ। नड्डन्नः ववनादन्यदपिभवति यथाअनसोवादोस
कारोडकारमिति श्वनड्डान् ववनात्सकारस्यडकारः परिभाषासूत्रमेतत॥
संख्यातानामनुदेशोयथासंख्यं समानसंख्यातानांयः पश्चादनुदेशः यःपश्चा
दादेशः सयथासंख्यंभवति यस्ययासंख्यायथासंख्यं प्रथमस्यप्रथमः द्विती
यस्यद्वितीयः तृतीयस्यतृतीयइत्यर्थः वक्ष्यतिसहोद्यांन्मरुतपितापदे
षु यथा मादःकृतेमदःकृतंतेभ्यः द्यो पिता द्योष्पितोपमा नमःपयशर्म्मं

Indira Gandhi National
Centre for the Arts

सप्रधानमस्यच्चे॥ परिभाषासूत्रमेतत्॥ सन्निकृष्टविप्रकृष्टयोः संनिकृष्टस्य
प्रा॰ यत्रोदाहरणसंशयस्तत्रेयं परिभाषोच्यते॥ संनिकृष्टविप्रकृष्टयोरुदाहरणयोः
सू॰ सन्निकृष्टस्यैवोदाहरणस्य कार्यं प्रत्येतव्यं न तु विप्रकृष्टस्य॥ यथा असि शिवा
२१ स्वघटे इत्येवमादिषु परभूतेषु असिशब्द आद्युदात्तः तत्र संदेहः किं स्वघ्ना वा
शिवा वा असि स्योना वा असि स्वघटे इत्यत्र असिशब्द आद्युदात्तो भवति॥ उत स्योना असि स्व
घटे इति उभयोरप्यसिशब्दयोः स्वघटाशब्दः परभूतस्तत्रानेनावधारणं क्रियते
यत्रान्यत्रापि सन्निकृष्टानि पदानि भवन्ति तत्र कार्यं भवति॥ तद्यथा स्व शिवा स्वघ
टा पयस्वती सन्निधानात् स्वघटपा वा असि शिवा वा असि स्योना वा असि स्वघटे इत्येवमे २१
वाद्युदात्तो भवति न तु स्योना असि स्वघटे इति विप्रकर्षात्॥ पूर्वोत्तरयोरुत्तरस्य॥ यत्र पू

र्वस्योत्तरस्य च युगपत्कार्यं प्राप्नोति तत्रोत्तरस्यैव भवति न तु पूर्वस्य॥ द्विरुक्तमुदाह
रणम्॥ द्विरुक्तमाम्रेडितं पदम्॥ द्विरभ्यस्तं पदमाम्रेडितसंज्ञं भवति यथा
यज्ञायज्ञा वो अग्नये अत्राम्रेडितसंज्ञायाः प्रयोजनमाम्रेडिते वोत्तरमित्यादि
म ३ हित ३ स्थितोपस्थितम्॥ इत उत्तरं पदसंहिता वक्ष्यते द्विरुक्तमित्यनु
वर्त्तते द्विरुक्तं पदमितिकरणेन मध्यस्थितेनाद्यन्तसंहितं पूर्वं पदमादिसंहित
मुपस्थितसंज्ञमुत्तरं संहितं स्थितोपस्थितसंज्ञं भवति यथा इडे इति इडे शीर्षं
ति शीर्षं पुनरिति पुनः वृक्तिमसमिति वृक्तिमसम् मन्नितमसमिति मन्नितमस
म् पवितमसमिति पवितमसम् तथा चोक्तम् उपस्थितं सतिकरणं केवलं तु पदं
स्थितं तत्स्थितोपस्थितं नाम यत्रोभ आदसंहिते अभ्यायः इतिकरणसहित
मुपस्थितसंज्ञं पदं भवति केवलमितिकरणरहितं स्थितं भवति यत्र पदान्यप

Indira Gandhi National
Centre for the Arts

प्रा
भा
२२

दीइतिकरणेनसंहितावाहृतस्थितोपस्थितंपदस्रुच्यते॥स्थितोपस्थितप्रदेशाः
पूर्वस्योत्तरस २ हितस्यस्थितोपस्थितमवगृह्यस्यस्थितोपस्थितस्यैवसावग्रहे
स्यस्वरविशेषविधानार्थमाह॥स २ हितावग्रहस्वरविधोपरंवसर्वेवेदनुदात्त
म् अवग्रहशब्देनसावग्रहस्यपदस्यपूर्वमभिधीयते॥अवग्रहस्वरविधोस्व
रविंतायांसंहितावत्स्वरंलभतेइतिकारेणसहसंधौ॥तस्मिन्सावग्रहपदे
हेपदेभवतः॥तत्रपूर्वस्यदत्तावदितिकरणेनसहसंधौसंहितावत्स्वरः ल
भते॥एवंचअवग्रहात्परंचशब्दात्संहितावत्स्वरंलभते॥यदितत्सर्वमनुदा
त्तंभवति॥यदितत्रकिंचिदक्षरमुदात्तंवास्वरितंवाभवतितदास्वकीयया
प्रकृत्याभवति॥यथावह्नितमसितिवह्नि नमम् गृहपतइतिगृह॥पते
प्रजावतीरितिप्रजा वतीः॥परंचसर्वेचेदनुदात्तंस्यात॥कस्मात्सूत्रेणान्पूर्ण २२

सूत्रेण विकृत्वरितिवि उरुवुः द्रोणकलशइतिद्रोणकलशः उदात्तोदाहरणम्॥रा
त्रस्वइतिराज स्वः स्वरितपदोदाहरणं स्वरविधावितिकिं वर्णविधोसंहितावन्न
भवति महद्भ्यइतिमहत् भ्यः तिष्ठद्भ्यइतितिष्ठत् भ्यः धावद्भ्यइतिधावत् भ्यः इ
तिपरस्मिर्यन्नीचोनोदात्तोभवतीत्यर्थः अंतोदात्तोमध्योदात्तोत्तापदे वाशब्दोभिन्नक्र
मोविकल्पार्थः काण्वस्याचार्यस्यमतेन अस्मान्सूत्रेणान्पूर्ण सूत्रेण द्रोणकलश
इतिद्रोण कलशः उदात्तसमोन्यत्रनीचएव काण्वस्याचार्यस्यमतेनेतिवर्तते
अंतोदात्तमध्योदात्तयोः पद्योरन्यत्रइतिकरणात्परोनीचउदात्तसमएवभवति प्र
चितएवभवतीत्यर्थः यथासोमपाइतिसोम पाः समितमितिसमित् तमम
नपितमभिन्निपपि तमम् एकवर्णपदमष्टकम् एकवर्णस्याष्टकसंज्ञाविधी
यतेपदस्ययथा आज अष्टकसंज्ञायाः प्रयोजनमष्टकमध्यानिरीणिलनिकमः

Indira Gandhi National
Centre for the Arts

श्री
शा
२३

स एवादिरन्तश्च स एव एको वर्णः पदसंज्ञः सन् पदादिसंबद्धानि पदान्तसंबद्धानि च कार्या
णि लभते यथा इन्द्र आहि इन्द्रेहि अवग्रहः पदान्तवत्॥ अवग्रहशब्देन पूर्वपदमि
हाभिधीयते॥ अवग्रहः पदान्तवदिति भवत्युपदेशादिति करणेपि प्राप्नोति स निषिध्य
ते॥ यथा॥ अन्तः क्षेप इत्यंतः॥ क्षेपः रिफितं च संहितायामनिरुक्तमित्यनेनेतिकर
ण॥ प्राप्नोति स निषिध्यते॥ पूर्वेणोत्तरः सं६हितः॥ इतउत्तरं संहितोच्यते॥ पूर्वेण प
दान्तेनोत्तरः पदादिः संहिता यदा क्रियते स्वरतो वर्णतश्च तदा हि पदसंहितोच्यते यथा
इषे त्वा वोर्ज्जे क्रमसंहितेयं॥ ॥ पदविच्छेदो संहितः पदे पदे विच्छेदः पदविच्छेदः
पदविच्छेदो यदा क्रियते तदा असंहितः पदपाठ उच्यते सा च पदसंहितोच्यते॥ यथा
इषे त्वा॥ ऊर्जे त्वा॥ ॥ एकपद द्विपद त्रिपद चतुष्पदानेकपदाः॥ एकं पदं यस्मिन्पा
दे स एकपदः पादः सा च पादसंहितोच्यते॥ छन्दसः पादपरिज्ञानार्थं॥ एकः पदः पादो २३

भवति यथा क्रदिस्पृशम् द्विपदः पादो भवति यथा क्रतोः भद्रस्य क्रतोर्भद्रस्य त्रिप
दः पादो भवति यथा अग्ने तं अद्या अग्ने तमद्य चतुष्पदः पादो भवति यथा
अग्ने विश्वेभिः स्वमना इति स्वमना अनीकैः अग्ने विश्वेभिः स्वमना अनीकैः॥
अनेकपदा पादो भवति यथा विधूम अग्ने अरुषं मियेध्य विधूमम अग्ने अरुषम्मि
येध्य वर्णानामेकप्राणयोगः सं६हिता एवं तावत्पादसंहिता सम्यक्कर्त्तव्या यच्च
श्रुत्यर्थविधिः वर्णानामेकोच्चारणयोगः पादोच्चारणयोगः पदे वा द्वि त्रि आमः
सा च प्राणसंहिता यत्र श्रूयांसि पदान्यनिशम्यावसानं भवति न चैकेन प्राणेन ता
नि व्याहर्तुं शक्यन्ते न त्वार्थविधिः यथा त्वामाग्ने पुष्कराद्ध्यथर्वा निरमन्थत विश्वस्य वाघतः चर्षणीनां च पादस्यानीता
नि व्याहर्तुं शक्यन्ते तत्रावसानं शक्यते व्याहर्तुं तत्रावसानमेवं वर्तितकर्त्तव्या यथा इन्द्रावि
धं जनमानः यत्रावसानं शक्यते व्याहर्तुं तत्रावसानमेव वर्तितकर्त्तव्या यथा इन्द्राबि
ष्वस्य राजति विराजति षधउत्तरं बलवद्लोपे शास्त्र इयमन्यत्र वर्तितार्थमेकस्मिन्

Indira Gandhi National
Centre for the Arts

प्रा
शा
२४

र्थेसङ्कृतेयत्रसतुल्यविरोधोविप्रतिषेधज्ञः।तत्रोत्तरंशास्त्रंबलवद्भवति।लोपंवर्ज्जे
यित्वा लोपेतुयदेवःलोपस्तदेवशास्त्रंबलवद्भवति यथास्वरितवान्स्वरितइत्यस्याव
काशः।अनुदात्तस्वरितसंधौस्वरितसंधौस्वरितोभवति यथा स्वाह्वाअवक्रंदाय स्वा
ह्वावक्रंदाय।तथावत्यति।उदात्तवानुदात्तः अस्यावकाशः उदात्तानुदात्तसंधौउदा
त्तोभवतियथा।स्तुत्माच अस्ति स्तुत्मावास्ति स्वरितोदात्तसंधौपरत्वादुदात्तएवभ
वति।यथा।सुघाइति।सुघेति राज्ञा इंद्रवत्या राज्ञेन्द्रवत्या।अलोपइतिकस्मात्
स्याएषवेत्यनेनशास्त्रेणास्यशाहस्यविसर्ज्जनीयोस्यंजनोपरेलुप्यते।एषस्यवाजी
एतत्त्वपूर्वंशास्त्रंनतोभवति।रेफेलुप्यतेदीर्घत्वोपधत्यनेनशास्त्रेणरेफेपरभूतेलुप्य
तेविसर्ज्जनीयउपधावद्दीर्घत्वापरंशास्त्रंनतोलोपस्यबलीयस्त्वाल्लोपएवभवति २४
नोपधादीर्घत्वं।।एषः स्यः राध्यः एषस्यगध्यो।दृषा एषः क्रागः एषक्रागः

पुरःविसर्ज्जनीयलोपः नशाकरःवक्रयोशमिति विसर्ज्जनीयोरिफितःइतउत्त
रंआकारोपधश्चविसर्जनीयोरिफितसंज्ञोवेदितव्यः वत्यतिकानुदात्तं यथा छि
द्रागात्राणिंस्तिनामिष्टकः संज्ञाकरणोप्रयोजनंभाव्युपधश्चरिफिसर्ज्जनीयइति
अधिकारस्तूत्रमेतत् करनुदात्तम् करित्यतत्पदमनुदात्तंवेदिफितसंज्ञंभव
ति करितिकः पूर्वः ऽ सङ्घकः अनुदात्तमितिकिं कोअस्यवेद।। ।।अन्तरना
युदात्तम् अन्तरित्येतत्पदंरिफितसंज्ञंभवति आद्युदात्तंवेत्तभवति यथाअन्तरि
त्यन्तः अन्तर्द्यावापृथिवी अनाद्युदात्तमितिकिं समुद्रश्चमध्यंवांतश्च इयंच
दिःपरोअन्तःपृथिव्याः।।१।। अहरमकारपरम् अहरित्येतत्पदंरिफितसंज्ञंभ
वति यथा प्रवयाह्नाहर्जिन्व अहरहरित्यहः अहः अहरहरप्रयावं भ
मकारपरमितिकिं शानहोभ्यःधुमिरहोमिरक्तुभिः आवःस्वरितिसमानर्थि आवः

Indira Gandhi National
Centre for the Arts

वः इत्येतेद्वे पदे रिफिते भवतः॥ उभे अप्येकस्याश्चेद्यदि पदे भवतः॥ यथा आवर्त
प्रा त्वावः वेन आवः वरितिव॥ असतश्च विव॥ समानश्चेति किं नमोवः किरिकेभ्यः अ
शा स्मेवो अस्त्विन्द्रियं स्तोतर्वस्तः स्तनुतरभार्वाद्वाः॥ वस्तः स्तनुतः अभाः वाः द्वाः ए
२५ तानि पदानि रिफितसंज्ञानि भवन्ति यथा स्तोतः एत ᳪ स्तोतरनेन यथा वस्तः
दोषावस्तर्धियायावयं॥ स्तनुवः आराच्चिद्द्वेषः॥ स्तनुतर्युयोत अभाः अग्निः ७
स्वयोनावभाः उखा वः॥ इदमहं तं स्वार्वाधिर्वा॥ द्वाः द्वार्भ्यः स्वाममास्वः पदमनरणे
स्वरित्येतत्पदं रिफितसंज्ञं भवति॥ अरणशब्दो यदि परतो न भवति यथा स्वः नस्व
र्णधर्म्मः॥ स्वः अभिविख्येषं॥ स्वरभिविख्येषं पदमिति किं पदावयवस्य रिफितसं
ज्ञा मा भूत्॥ राजस्व इति राजस्वः॥ स्वाहा राजस्वः॥ अनरण इति किं॥ स्वायचारण २५
यच पदादिश्चाजित्पर इति वक्ष्यति तस्यायं पुरस्तादपवादः॥ पदादिश्चाजित्प

रः पदादिश्च यदि स्वशब्दो भवति तदा रिफितसंज्ञो भवति जित्परश्चेन्न भवति द्वौ द्वौ
प्रथमौ जित्युक्तं यथा स्वर्गायेति स्वः गाय स्वर्गाय शन्त्या पदादिरिति किं स्वाहा
राजस्वः अजित्परमिति किं स्वः स्वामिति स्वः साम पदसंहितोदाहरणम् द्वाः
सवितः पुनस्त्वष्टर्नेष्टरक्रहोतर्म्मातः प्रातर्ज्जामातरजीगः प्रणेतरितिव द्वाः
सवितः पुनः त्वष्टः नेष्टः अक्रः होतः मातः प्रातः जामातः अजीगः प्रणेतः इ
त्येतेषां पदानां विसर्ज्जनीयो रिफितसंज्ञो भवति यथा द्वाः द्वाम्सतियस्तपतिः स
वितः देवसवितरेतत्ते पुनः पुनर्म्मनः त्वष्टः देवत्वष्टर्भूरिते नेष्टः ग्रावो नेष्टः पि
बऋतुना अक्रः समस्मतित नि द्वधातवक्रः होतः सोम ᳪ होतर्यजन मातः पृ
थिवि मातर्म्मा मां हिᳪ सीः प्रातः इन्द्र प्रातर्ज्जुषस्व जामातः त्वष्टर्ज्जामा
तरद्भुत अजीगः इन्द्रधीरजीगः प्रणेतः भगप्रणेतर्भगसत्यराधः इन्द्रं त्वष्टारि

Indira Gandhi National
Centre for the Arts

प्रा
शा
२६

वृद्धमिदंशास्त्रं॥ अन्यानिशास्त्राण्यपवेत्यशिक्षाविहितंव्याकरणविहितंवास्मिन्नुभयं
यतः प्रक्रियते॥ अतएवहेतोः शिष्याणामेतच्छास्त्र आविणवृद्धिर्भवति आनंदवा
स्तव्यवज्रटसुतस्यउवटकृतौप्रातिशाख्यभाष्येप्रथमोध्यायः॥ ॥ ॥ ॥ ॥
संज्ञापरिभाषाः प्रथमाध्यायेउक्ताः शास्त्रसंव्यवहारार्थमिदानीस्वरसंस्कारयोश्छंद
सिनियमइतिप्रतिज्ञातौस्वरसंस्कारावारभ्येते॥ तत्रचप्रथमंस्वरः प्रतिज्ञातइत्यतः
स्वरएवप्रथममारभ्यते स्वरितवर्ज्जमेकोदात्तं पदम्॥ एकस्वरितपदंवर्ज्जयित्वाए
कोदात्तंपदंभवति॥ सर्वस्मिन्नेवपदेएकमात्रांस्वरितंवोदात्तंवाभवति॥ अन्यान्यक्ष
राण्यनुदात्तानीतिसूत्रार्थः॥ तत्रस्वरितस्यचत्वारोभेदाभवंति॥ तद्यथा॥ आदिस्वरि
तंमध्यस्वरितंअंतस्वरितंसर्वस्वरितानिपदानिभवन्ति॥ आदिस्वरितंभवति॥ व्युत्के २६
शाया॥ मध्यस्वरितंभवति॥ मनुष्याणाम्॥ अंतस्वरितंभवति॥ वेलृच्यो॥ सर्वस्वरितं

स्वः १
भवति स्वः उदात्तस्यचत्वारएवभेदाभवंति तद्यथा आद्युदात्तंमध्योदात्तंअंतोदात्तंस
र्वोदात्तानिपदानिभवन्ति आद्युत्तंभवति अश्वः त्वाद्य मध्योदात्तंभवति त्रितीय
द्वितीय अंतोदात्तंभवति इषे ऊर्ज्जे सर्वोदात्तंभवतिव उ एताअष्टौपदवि
क्रयोनेनसूत्रेणोक्ताः ह्युदात्तस्युदात्तसर्वोदात्तान्वत्यपति एवमेकादशपदभक्त
याभवंतिसर्वेषुवेदेषु अनुदात्तं स्वरितास्याः उदात्ताद्वापदवशिष्टंतदनुदात्तं
भवति उक्तान्येवोदाहरणानि तोनोमेमदर्थंत्रिष्वेकेषु अनुदात्तमित्यनुवर्त्तं
तः नः नोः मे॥ एतानिपदानिमदर्थेवर्त्तमानानि अस्मदर्थंयदिवर्त्तमानिभवंति
बहुवचनद्विवचनैकवचनाभिधायकानिचयदिभवन्तितदानुदात्तानि यथा नः
शान्तइन्द्राग्नी॥ अस्मकृणोगार्हपत्यानि मे इमामेअग्नइष्टका: माच मा
इत्येतच्चपदंमनुदात्तंभवति अस्मदर्थेचेद्वर्त्तते मायया आमानाग्ना मदर्थंइ

Indira Gandhi National
Centre for the Arts

प्रा
शा
२७

निकिं॥मापोमौषधीः॥वांवांतेत्वदर्थे॥वः॥ वाम्॥ते॥एतानिपदानियुष्मदर्थेवर्त्तमा
नानि॥बहुवचनद्विवचनद्विवचनेकवच[redacted]नेषुयथासंख्यंवर्त्तमाना
नि अनुदात्तानिभवन्ति॥यथा॥वः॥तंवो॥दस्मम्॥आवांदेवासईमहे॥वाम् अ
यंवाम्॥यावाङ्कुशा॥ते॥एषतेरुद्रभागः॥अयंतेयोनिर्ऋत्वियः॥त्वाच॥त्वाइत्ये
तत्पदंयुष्मदर्थेवर्त्तमानं॥अनुदात्तंभवति॥त्वा॥यथा॥मात्वाग्निर्ध्वनयीत् तंत्वा
शोचिष्ठ॥नोनौमेइती[redacted]स्त्रत्रेणसिद्धेयन्मदर्थेतिद्वौकेषुचवदति तच्छिष्य
सुत्पादनार्थम्॥माइत्येतस्यपदस्यमदर्थइतिविशेषणंकर्त्तव्यम्॥प्रतिषेधा
र्थस्यापि॥संभवात्॥वोवांने एतेषांचपदानांत्वदर्थइतिविशेषणंशिष्यव्युत्पा
दनार्थमेवार्थस्याव्यभिचारात्॥पूर्ववानुदेशः॥पूर्वैः पदैः प्रज्ञापितस्यार्थस्य २७
यत्रपश्चादस्मैएषांअस्मिन्नित्यादिसर्वनामदंतस्यैवार्थस्याभिधायकंभवति

तदनुदशाशष्हरोच्यते॥तदनुदात्तंभवति॥असौ॥यथा॥अश्वायेवतिष्ठतेघासम
स्मै॥एषांयथा॥इदेदेषांकृणुहिभोजनानि॥अस्मिन्॥यथा॥आस्मिंहव्याग्नि
होतन॥पूर्ववानितिकिम्॥सोमःपवतेसोमःपवतेस्मैब्रह्मणे॥आसाम्प्रजाना
मेषाशाश्चनाम॥असि॥असीत्येतत्पदमनुदात्तंभवति॥यथा॥छत्तास्यावेरध्वः॥वे
दिरसिबर्हिषेआख्यातपदमतिशब्दः॥तस्यवन्धमाणत्वात्स्वरःप्राप्तएवइदय
ग्रहणम्॥तदाख्यातपदानभिज्ञस्यज्ञापनार्थम्॥यथाइआभुवोग्निभ्यः॥यथाश
त्रुःइआभुवोग्निगाद्भ्यःपरोनुदात्तोभवति॥इआ॥यथा॥इराजीवइआयथा॥भु
वः॥सत्पम्यातिभुवोयथा॥चमयः॥आनन्तोऽश्वमयोयथा॥एतेभ्यइतिकिं॥यथा
नोवस्यसस्करत्॥गिर्वणः॥गिर्वणइत्येतत्पदमनुदात्तंभवति॥परिलागिर्वणो
गिरः॥एतत्नामंत्रितत्वादेवानुदात्तंप्राप्तंयत्पुनरुच्यतेतदामंत्रितानभिज्ञस्यापि

Indira Gandhi National
Centre for the Arts

भा
षा
२८ प्रत्ययार्थम्॥अग्नेघृतेनेतिच॥अग्नेघृतेनत्येतत्पदंअनुदात्तंभवतियथा॥अग्नेघृते
नाहुत॥अग्नेपूर्वमितिकिं॥अङ्गिरोघृतेनवर्द्धयामसि॥प्रचिकितश्च प्रपूर्वश्चिकित
इत्येतत्पदमनुदात्तंभवति॥यथात्वं सोमप्रचिकितोमनीषा॥प्रपूर्वमितिकिं अ
न्यपदपूर्वमुदात्तंभवति॥एतत्पदस्यामंत्रितत्वादेवानुदात्तत्वंमंदधीप्रतिपत्त्यर्थमु
च्यते एनः पापे एनइत्येतत्पदमपापवाचिअनुदात्तंभवति॥अविशेषाश्चैतस्मा
दितिपदिकमात्रंसर्वलिङ्गंचगृह्यते पुल्लिङ्गंभवतियथा॥उदेनमुत्तरान्नय॥स्त्रीलिं
गंभवतियथा॥मैनामपसामाखिंघाभिशोची॥नपुंसकेभवतियथा॥मातेवपु
त्रंबिभृतास्वेनत् अपापइतिकिं॥यदेनश्चकृमाद्वयं देवकृतस्येनसोवयजननन
म् इदपूर्वं ६ श्रुतं इदपूर्वंश्रुतमित्येतत्पदमनुदात्तंभवति॥यथा ममेदिदश्रु २८
तं हवम् इदपूर्वमितिकिं॥श्रुतम्मेमित्रावरुणा एतच्चाख्यातत्वादेवानुदात्तंम

दधीप्रत्ययार्थमुच्यते मन्येपदपूर्वं ६ सर्वत्र मन्येइत्येतत्पदंपदपूर्वमनुदात्तंभवति
सर्वत्रयथा अग्नि २ होतारम्मन्ये आख्यातत्वादाख्यातंएवम् यद्योगादिभिःस्वरविकारो
यःप्राप्तःसोनेनसर्वत्रग्रहणेनप्रतिषिध्यते अपदपूर्वस्यप्याप्यते तावंतकृषि
त्वाकस्मादृहस्मच ईम्मर्याअरस्विन्निपाताः श्रुत वाचकम् उवितसमस्मात् बृह
स्मचः ईम् मर्याः अरस्वित् एतानिअनुदात्तानिपदानिभवंतियदिनिपाताभवं
ति यदिअसत्ववचनानिभवंतीत्यर्थः वायथा वातोवामनोवा च अग्निश्चपृथि
वीव कम् इमानुकंभुवनासीषधाम उ यज्ञसंश्रुतस्य ६ रताः स्वित् चनापवक्रान्
दयाविधिश्चित् समस्मात् उरुष्याणाअध्यायतःसमस्मात् घाआधायेअग्निमिंधते
ह दधेहगर्भमृत्वियम् स्म अत्रघ्नत्देवैरक्तिहिष्माते त्वः पीयतिताअनुत्वा
गृणाति ईम् काईमेरमर्याः आविर्मर्याः अरे अन्तारे स्वित् अधःस्विदासीन्

Indira Gandhi National
Centre for the Arts

उपरिस्विदासी३त् तुंनिपात॥इति॥ किम्॥वा॥चिदसि॥क ६ स्विद्गर्भंप्रथमंदध्रआपः॥
प्रा पदपूर्वमामंत्रितमनानार्थेपादादौ॥पदपूर्वमामंत्रितंयत्तदनुदात्तंभवति॥यदिनाना
शा भूतस्यार्थेयदिचपादादौनभवति॥पदपूर्वंभवति॥त्वमग्नेव्रतपाअसि॥वय २ सोमव्र
२९ तेतव॥अनानार्थइतिकिम् मित्रस्यमावरुणस्यधमप्रियः आदित्यानांपत्वान्विहिदे
वाआशापालाः॥अपादादावितिकिम्॥यावाङ्कशामधुमत्यश्विनासू ६ मियुवस्तेष्टुघन्नग्ने
तेनाननराषष्ठ्येकपदवत्॥तेनामंत्रितेनाव्यवहिताषष्ठीषष्ठ्यन्तंपदमेकपदवद्भवति
आनन्तर्यंचेदेकदेशाकृतमर्थकृतंचगृह्यते॥देशाकृतंपुरस्तादुपरिष्टाद्वाषष्ठ्यन्तमामं
त्रितस्य॥अर्थकृतमेकार्थीभावः॥यदितत्॥षष्ठ्यन्तंवाक्यंतस्यामंत्रितस्यविशेषणंभ
वति॥अथैकपदवत्त्वेरोभवति॥एतदुक्तंभवति॥यदिततषष्ठ्यन्तंवाक्यादौवापदादौ
वानभवति॥पदपूर्वंचेद्भवति॥अथतदप्यनुदात्तंभवति॥ततोन्यथात्वेआयुदात्तंभव २९

अत्राश्विनाइति पादादावपि च षष्ठीतितत्रयो

ति यथा अपान्नपात् देवीरापोअपान्नपात् ऋषीणान्नपादवृणीत भुवांपते वि
श्वासांभुवांपते उत्तिष्ठ ब्रह्मणस्पते अनन्तरेकिम् ब्रह्मणस्पतेवमस्य एकपदवदि
तिवत्युपदेशादत्रआयुदात्तत्वंषष्ठ्याभवति नयथाऊर्जोनपाज्जातवेद इत्यत्रोर्ज
इतिशाब्दस्यषष्ठ्याभवति नयथाऊर्जोनपाज्जातवेदइत्यत्रोर्जइतिशाब्दस्यषष्ठ्यन्तस्य
तेनानन्तराषष्ठ्येकपदवदित्यनेनसूत्रेणामंत्रितस्याननराषष्ठ्येकपदवत्त्वंलभतइ
त्येतदुक्तं आयुनाच्यामंत्रितेनसहयत्रषष्ठ्याएकार्थीभावोनभवति तत्रत्वनुदात्तर
णांभूतंच्छिद्यात्रिषुदानार्थंस्वयमेवन्हन्नकारःपदति नटछिदिदेवयज्ञस्तोषध्या
देवकृतेःपवित्रपतेपवित्रपूतस्यपान्नपाद्वृणां त्रुपतेसोमाग्नेःसोमेत्यपतीसस्तवी
धोक्यसोमस्तिष्ठीवांदेवानाऊमापतेयस्य यस्यदेवाग्नितवाग्नेवानस्यानहणस्यपोत्र।
स्याकम् त्वयिविदेवयज्ञस्तोषध्याः देवकृतेः पवित्रपतेपवित्रपूतस्य आपान्नपात्

Indira Gandhi National Centre for the Arts

नै०

घा शा २० नृणान्नृपते॥सोमाग्नेः सोमेंद्रस्य॥सोमरुद्रवीर्यस्य॥सोमविश्वेषांदेवानां [illegible] प्रजापतेयस्य
यस्यदेव॥अग्नेतव॥अग्नेवाजस्य॥अग्नेवरुणस्य॥आपोअस्माक॥एतेषामामंत्रिता [illegible] अनंत
राषष्ठीसा [illegible] कार्थीभावान्नैकपद्वत्स्वरंलभते॥यथा॥पृथिविदेवयजन्योषध्यास्ते॥देव
भूरेः॥धामस्पद्दितयस्यदेवभूरेः॥पवित्रपवित्रपूतस्य॥अपांनपात्॥अपान्नृपात्प्रतिरक्ष
न्नसुर्यम॥हृणां॥चनृणान्नृपतेजाय [illegible] मेस्तुवि॥सोमाग्नेः॥उशिक्त्वंदेवसोमाग्नेः सो
मेंद्रस्य॥वशीत्वंदेवसोमेंद्रस्य॥सोमरुद्रवीर्यस्य॥अछिन्नस्यंतेदेवसोमरुद्रवीर्यस्य॥सोम
विश्वेषांदेवानाम्॥प्रजापतेयस्य॥मनोभुवस्यपतेप्रजापतेयस्य॥यस्यदेव॥यस्यदेवदधिषे
अग्नेतव॥अग्नेतवश्रवोवय॥अग्नेवाजस्य॥अग्नेर्वाजस्यगोमतः॥अग्नेवरुणस्य॥त्वंनोअ
वरुणस्य॥आपोअस्माकम्॥आपोअस्माकमन्न [illegible] रेसुशेवाः॥एवमादीन्यन्यान्यपिप्रत्यु २०
दाहरणानिद्रष्टव्यानि॥यथा॥यस्यौषधीःप्रसर्पथ॥सुमंङ्गलसत्पराजनविकिरिद्र

विलोहितदरिद्रनीललोहित श्रेयस्कर भूयस्कराम्बे अम्बिके अम्बालिके शरव्ये ब्रह्मन ८ शितेम
हतो अश्विना यव्ये गव्ये द्यावापृथिवी उरो अग्ना इ पत्नीवन् ऋजी २ क्रावी ३ न्मीढुष्टम शिवतम
सहस्राक्षशतेषुधे वसुपते वसुदावन् सुमंङ्गलसत्पराजन् विकिरिद्रविलोहित श्रेयस्क
र भूयस्कर अम्बे अम्बिके अम्बालिके शरव्ये ब्रह्मन ७ शिते महतो अश्विना यव्ये गव्ये द्यावपृथि
वीउरो अग्ना इ पत्नीवन् नाजी २ क्वी ३ न मीढुष्टम शिवतम सहस्राक्षशतेषुधे वसुपते
वसुदावन् एतान्यामंत्रितान्यनुदात्तानि न भवन्ति पदपूर्वस्यामंत्रितस्यापवादः सुमंङ्गलस
त्पराजन्यथा सुश्लोकसुमंङ्गलसत्पराजन् विकिरिद्रविलोहित दरिद्रनीललोहित [illegible]
~~[illegible]~~ पादादित्व [illegible] दनत्वंमिदमेव ~~[illegible]~~ एतद् [illegible]
[illegible] श्रेयस्कर भूयस्कर यथा बहुंकार श्रेयस्कर भूयस्कर
[illegible] अम्बिके अम्बालिके शरव्ये ब्रह्मन्त ८ शिरे अयस्मृष्टापरांपतशरव्ये ब्रह्मन ७ शित मह

Indira Gandhi National
Centre for the Arts

तो अश्विना॥ इतोमरुतो अश्विना यवेगव्ये यवेगव्य एतद्दन्नम देवाः द्यावापृथिवीउरोत्र
प्रा न्तरिक्ष॥ अग्नाइ॥ अग्ना॥४॥ इयत्नीवन्॥ लाजी॥३॥ छाचीन्॥ भूर्भुवः स्वर्लाजी॥३॥ छाचीन्॥ मी
ख्या ढुष्टम शिवतम॥ मीढुष्टम शिवतम शिवोनः॥ सहस्रान्तशतेषुध॥ धनुष्टु॥४॥ सहस्रान्तश
३१ तेषुधो॥ वस्तुपतेवसुदावन्॥ मघवावस्तुपतेवसुदावन्॥ इत्येतानिनवरवानो न्तराणिषड॥
प्सुतन्तराणिचत्वारिंभगोन्तराणिचेन्द्रोन्तरंमेक॥२॥ सिनीवाल्युत्तरंचप्रजापतयेब्रह्मन्निति च हव्येकाम्येइ नेकं
इडेन्तराणिनवामंत्रितपदानिआद्युदात्तानिभवंति॥ यथा॥ इडेरन्ते॥ हव्येकाम्ये॥ चंद्रे॥ ज्यो
ति॥ अदिति॥ सरस्वति॥ महि॥ विश्रुति॥ स्वानो न्तराणिषडामंत्रितपदान्याद्युदात्तानिभवंति
स्वान॥ भ्राज॥ अंघारे॥ बम्भारे॥ हस्त॥ सुहस्त॥ कृशानो॥ अग्न्युत्तराणिचत्वारिआमंत्रितपदानि
आद्युदात्तानिभवंति॥ अग्ने॥ इंद्र॥ वरुण॥ मित्रदेवा॥ भगोन्तराणि॥ चशब्दाच्चत्वार्येवंआमंत्रित ३१
पदान्याद्युदात्तानिभवन्ति॥ भग॥ प्रणेतः॥ भगसत्यराध॥ भग॥ इंद्रोन्तरमेकमामंत्रितपदमा
भगादित्राधोनएक:

द्युदात्तंभवति इंद्रगोमन् सिनीवालीत्युत्तरंच चशब्दादेकपदमेव सिनीवालिपृथु
ष्टुके प्रजापतयेब्रह्मन्निति च चशब्दादेकमेव. प्रजापतयेब्रह्मन् अश्वम् श्रुतिरा
द्युदात्तम् अनुदात्ताधिकारेणनिष्टत्तः इतउत्तरमाद्युदात्ताधिकारः श्रुतिरित्येतत्पदमा
द्युदात्तंभवति श्रुतेजागरणान् नमोश्रुत्यै श्रुतिरितिकिम् श्रुतंयमेभविष्यच्चमे क
दान्नरिष्यमपूर्व्यम् कदेत्येतत्पदमाद्युदात्तंभवति नरिष्यमपूर्व्यंस्वित् नरिष्यमकदा
चन नरिष्यमकदाचन नरिष्यमपूर्वमितिकिम् कदाचनस्तरीरसि आमंत्रितंच
आमंत्रितमाद्युदात्तंभवति यस्यामंत्रितस्याधत्तात्स्वरेणविहितः कस्यबाधनात्स्वरेण
विहितः पदपूर्वंयन्नभवतिपादादौवावाक्यादौवायाद्भवतितदाद्युदात्तंभवति पदपूर्वं
यन्नभवतियथा अग्नेगृहपते वाक्यादौभवति अग्नय. मरुत. देवाआशापालाः
पादादौवावाक्यादौवाद्भवतितदाद्युदात्तंभवतियथा यावाङ्कशामधुमत्यश्विना विश्वेभि:

Indira Gandhi National
Centre for the Arts

पा
शा
३२

सोमः सधन्नो॥ स्त्वमंगलादिनिपातमेवा॥ कण्ठो मृगसंयोगे॥ कण्ठः शब्दो मृगवचन आद्युदात्तो
भवति॥ कण्ठोस्यास्ति वरेण्टः कण्ठो गव्या मल्लेजनतः॥ मृगसंयोग इति किम्॥ श्वाकण्ठः कण्ठो
गर्दभः॥ अत्र कण्ठशब्दो न मृगवचनः॥ वर्णविशेषाभिमतत्वात्॥ अव्ययवाञ्चानः॥ अत्र श
ब्दो द्विविधः॥ अव्ययवानव्ययवांश्च॥ यस्य विभक्त्यादिभिर्विकारो न क्रियते॥ तदव्ययम्॥ तथा
चोक्तं॥ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु॥ वचनेषु च सर्वेषु यन्न व्येति तदव्ययमि
ति॥ यस्य विभक्त्यादिभिर्विकारः॥ क्रियते स व्ययवान्॥ स आद्युदात्तो भवति॥ स्वरादिश्च मध्यं
वा॥ तत्र॥ इयं वेदिः परो अन्तः पृथिव्याः॥ व्ययवानिति किम्॥ अन्तर्यच्छमघवन्॥ परः प्र
धाने॥ परशब्दः प्रधानवचनः॥ अपरमिति वचन आद्युदात्तो भवति॥ यस्मात् जातः परो
अन्यो अस्ति॥ इयं वेदिः परो अन्तः पृथिव्याः॥ प्रधान इति किम्॥ परोदिवापर एना॥ मात्रा च ३२
परिमाणे॥ मात्राशब्दश्च परिमाणवचन आद्युदात्तो भवति॥ कस्य मात्रा न विद्यते॥ गोत्व

मात्रा न विद्यते परिमाणवचन इति किम् विश्वकर्म्मा मात्रा मूः पिता अत्र मातृशब्दस्य
संबंधिवचनस्य तृतीयान्तस्यैतद्रूपम् अतः परिमाणवाची न भवति दक्षिणा च द
क्षिणाशब्दश्चाद्युदात्तो भवति यथा अस्य इन्द्रस्य दक्षिण अप्सरस दक्षिणयन्तः पुर
एत सोमः नद्यो विश्वकर्म्मो निषद्यं इन्द्रस्य पात्रसदः सङ्गेषु दशा विश्वकर्म्मा निष
द्य ई इन्द्रस्य पात्र सदः सङ्गः एतेषु परभूतेषु दक्षिणशब्द आद्युदात्तो न भवति द
ग्यधा दक्षिणा दक्षावती वीः विश्वकर्म्मा अयं दक्षिण विश्वकर्म्मा निषद्यस्याख्यानेन
दक्षिणतो निषद्य इन्द्रस्य पुत्रवती दक्षिणत इन्द्रस्य पात्र विदृशिर्द्दक्षिणतः पात्र
सदः श्रमने [illegible] दक्षिणा सदः सङ्ग [illegible] देवेभ्यो दक्षिणा सङ्गाः कर्णः स्वाङ्गे कर्ण
शब्दः स्वाङ्गाभिधायी आद्युदात्तो भवति अच्छकर्णेभिः शृणुयाम [illegible] कर्णे [illegible]
ख्येन स्वाङ्ग इति किम् श्याकर्णः कर्णो गर्दभस्य नदीनद [illegible] सदः शब्दो न पु

Indira Gandhi National
Centre for the Arts

प्रा सकवचनआद्युदात्तोभवति॥महस्यमहोभद्दीय नप्रा॥सकइतिकिम्॥महोदेवोमर्त्यांऽ

शा ऽआविवेश॥महोदेवायतदंत॥महो॥अग्नेः॥सनिधानस्या॥त्वस्त्र॥अव॥शाब्दस्त्रनपुंस

३३ कवचनआद्युदात्तोभवति॥अव॥ अग्नेतवअवोवयः॥नपुंसकइतिकिम्॥अवश्रमेश्र

तिश्रमे॥अंधोवीर्ये॥अंधशब्दोवीर्यवचनआद्युदात्तोभवति॥अंधस्था॥धोवोभद्दीय॥वी

र्यइतिकिम्॥अंधन्तम॥ अंधमधर्म्मायवधिरं॥एतावर्णे॥एताशब्दवर्णवचनआद्यु

दात्तोभवति॥एताऐंद्राम्॥॥वर्णइतिकिम्॥एतामेअग्नइष्टकाधेनवः॥रोहितश्चके

वल॥रोहितश[illegible]ब्दोवर्णवचनःकेवलःअसमासस्यआद्युदात्तोभवति॥यथा

रोहितोधूम्ररोहितः॥वर्णवाचीतिकिम्॥रोहित्कुडुणाचीगोलन्तिको॥केवलइति

किम्॥धूम्ररोहितःकर्कधुरोहितः॥यंत्रीराट्॥यंत्रीशब्दआद्युदात्तोभवति॥राड्रश्चेद्भ ३५२

वति यथा॥ यंत्रीराट्॥राड्रइतिकिम्॥यंत्रसियमनीः॥ओषधीरनामंत्रिते॥ओषधी ३२

शब्दोनामंत्रिताभिधायीआद्युदात्तोभवति यथा याओषधीःपूर्वाजाताः अनामंत्रितइ

तिकिम् यस्योषधीवसर्पथ सर्वविश्वमानुषाआशाःस्वाहावाजःपयोनमः सर्ववि

श्व मानुषा आशाःस्वाहा वाजः पयः नमः एतानिपदान्याद्युदात्तानिभवंति

सर्वंयथा सर्वेनिमेषाजज्ञिरे विश्व यत्र विश्वंभवत्येकनीडम् मानुषा दैव्यंमा

नुषायुगा आशाः विश्वाआशाःप्रमुंचतु स्वाहा किंकारायस्वाहा वाजःवाजश्चसे प

यःपृथिव्यामपयओषधीषु नमः नमोहिरण्यबाहवे असिशिवास्तुषदापयस्वती

यत्तेमधुमतीर्द्धंस्वानोजिह्वोअनिषः इष्मिणीभद्रवाचायवंधोमेध्यायमः

आदित्यस्त्रितःसोमन्त्वसेत्येतेषु असि अस्वित शिवा स्तुषदापयस्वती यत्ते

मधुमती. वधस्वाम् ऊर्जिष्ट. भ्राजिष्टः इष्मिणी भद्रवाचाय वंध मेध्यः यमः

आदित्यःत्रितः सोमेन स्वसा अयमीत्ययमधस्तादनुदात्तउक्तः सएतेषुपरक्षेन

Indira Gandhi National
Centre for the Arts

षु आद्युदात्तो भवति॥ शिवा॥ यथा॥ त्वुत्माबासि॥ शिवा॥ यथा॥ तत्मात्तुषदा स्योनाचासि
प्रा सुषदा॥ पयस्वती॥ ऊर्ज्जस्वती चासि पयस्वती च॥ यत्ते॥ योस्याः पृथिव्यामसि यत्ते मधु
शा मती॥ येषां भागोसि मधुमती॥ वर्चस्वान्॥ त्वं देवीष्वसि॥ वर्चस्वान्॥ ऊ जिष्ठ॥ त्वं देवेषु
२४ स्योजिष्ठ॥ ओजिष्ठ त्वं देवेष्वसि स्वाजिष्ठः॥ सुरात्वमसि शुष्मिणी भद्रव होतरसि
भद्रवाच्याय वंघ॥ ईध्यस्त्वाग्निवंध स्ववांजिन्नमेध॥ आस्तुस्त्वासि मेध्यस्त्वसम्नेयमः
असि यमः॥ आदित्य॥ अस्यादित्योऽर्चन्॥ चित॥ असितेत्रितो गुह्येन व्रतेन॥ सोमेन
असि सोमेन स्वसा॥ या देवानामसि स्वसा॥ धनदा रत्नधा॥ भ्यां च॥ धनदा रत्नधाभ्यां च प
रः असि शाद्व आद्युदात्तो भवति॥ धनदाः॥ यथा॥ त्वं २ हि धनदा असि॥ रत्नधा॥ त्व २ हिर
त्नधा असि॥ रायो॥ पोषे॥ राय इत्येतत्पदमपोषे वत्पये आद्युदात्तं भवति॥ यथा॥ त्वे रायो २४
मेराय॥ अपोष इति किम्॥ रायस्पोषेण वियोष्म॥ न भागमीशिषयोः॥ भागमीशिषे

योः परे रा राय इत्येतत्पदमाद्युदात्तं न भवति भागं रायो भाग ५ सहसावन् ईशिषे यथा
व २ साहस्रस्य राय ईशिषे त्रिधा बद्धहितयोः त्रिधा शाब्दो बद्धहितयोः परयोराद्युदा
त्तो भवति: बद्ध: यथा त्रिधा बद्धो वृषभो रोरवीति हितं यथा त्रिधाहितं पणिभिः सहितं
हेतं सहितेति शाब्दो भूतानि यथा आद्युत्तः सकः पृथुः सहितः कार्य अभूतं भूत इति किम्
स्यूकं च मेत्वक्रातंशातं च मे हिरण्यमानि हिः उदात्तं येषु पदेषु तानि हि कदात्तानि तत्प्रत
इस्तित्वे शेषः अधिकारस्त्वमेतत् बृहस्पतिर्वनस्पतिर्नैरशा ३ स तनूनपात्मेन तनून
पात्नित्वाल्ला प्रत्यान्तता समाहृहिनीशाघाशाना क्राल्पस्याश्यामतता द्वन्द्व तवादीन
बृहस्पति वनस्पतिः नराशं ३ सः तनूनप्त्रि तनूनपात् नक्तोषासा उषासानक्ता द्या
वा पृथिवी द्यावाक्षामा क्रान्तदन्ता भ्याम एतवै अवेतवै एतानि पदानि हि कदात्तानि भ
वंति अदेवतादंद्वार्थं आरंभः प्रवृत्तपेपादाहरणानि देवताद्वंद्वान्यनामंत्रितानि व इव
इका

प्रा
शा
२५ ताद्वंद्वानि च द्विरुदात्तानि भवंति॥ आमंत्रितानि वर्जयित्वा॥ यथा॥ अग्नीषोमाभ्यां त्वा जुष्टं गृह्
ह्णामि॥ मित्रावरुणाभ्यां त्वा॥ देवताद्वंद्वानीति किं॥ ऋक्सामयोः शिल्पे स्थस्तावयस्तौ स्तद्रु
रसि॥ अनामंत्रितानीति किं॥ तांधेनुं मित्रा॥ वरुणा॥ षष्ठ्याद्यध्यत्वनसूत्रविहितान्यनामं
त्रितानि द्विरुदात्तानि भवंति॥ आमंत्रितानि त्वामंत्रितस्वरलभंते॥ यथा॥ बृहस्पतेअति
यदर्योअर्हात्॥ तनूनपात्पथऋतस्ययानान्॥ इंद्राबृहस्पतिभ्यामिंद्राबृहस्पतीइतित्री
णि॥ इंद्राबृहस्पतिभ्याम्॥ इंद्रास्पतीबृहस्पतीइत्येतयोः पदयोस्त्रीण्युत्तराणिउदात्तानि
भवति इंद्राबृहस्पतिभ्यांत्वादेवाव्यं॥ इंद्राबृहस्पतीऊरुस्याम्॥ सर्वमग्ना॥ इलाजा॥ काव्य
वीनिति त्रिमात्राणि तिच॥ सर्वमग्ना॥ इलाजी॥ काव्यीन् एतानि पदानि सर्वोदात्तानि भ
वंति॥ त्रिमात्राणि च॥ त्रीण्युत्तराण्येतेषु पदेषु भवति॥ यथा॥ अग्ना॥ इकारलजी॥ नू
ईकारः॥ शाची॥ नई कारः॥ प्रणवश्च॥ प्रणवश्च॥ सर्वोदात्तो भव॥ यथा॥ ओं॥ मनस्वं ब्रह्मा २५

त्रिवेशा इति चानुदात्तम्॥ विवेशा इति एतत्पदं मध्यमनुदात्तं भवति उष्ट्रादाम सत्तरं वास्य
त्रिमात्रं भवति यथा येषु विश्वं भुवनमाविवेशा॥ आसीदिति बोत्तरं विचारे आसीदित्ये
तत्पदं विचारे वर्तमानं मुत्तरं स्वरितानुदात्तं भवति तस्य चात्य सत्तरं मात्रं भवति उपरिस्विदा
सी॥ इकारा विचार इति किं कास्विदासीत् पूर्वमनुदात्तं पूर्वमनुदात्तमासीदि
त्येतत्पदं पूर्व विचारे वर्तमानं अंतोदात्तं भवति त्रिमात्रं वास्य चान्यपरं स्वं भवति अधः
स्विदासीत् इंद्रं येन सोम पूर्व पूषाग्निवायुषु देवता द्वंद्व च इंद्र सोम पूर्व पू
षाग्निवायुषु परभूतेषु अंतोदात्तं भवति द्विरुदात्तायवाद इंद्रापूषणा प्रियमध्यतिपा
था॥ इंद्राग्नी रुद्रज्ञानि मद्रूपं चित्र इंद्रवायुभ्यां वा सोम पूर्वस्य यथा संभवं मुदाहरणं
अग्निश्चेंद्रो अग्निश्चेंद्रेण तत्र परपदे देवताद्वंद्व समासांतोदात्तं भवति अग्नीन्द्राभ्यां त्वा रुद्र [illegible]
सामनि ऋकपूर्वं साम शब्दोत्तरपदे द्वंद्व समासे अंतोदात्तं भवति ऋक्सामाभ्यां संत

Indira Gandhi National
Centre for the Arts

आ रतः॥ यत्नोमते॥ यित इत्येतत्पदं गतोवर्त्तमा॥ नमन्त्रोदात्तंभवति॥ स्वर्यतोधियादिवम्॥ इए
३६ गताविंत्यस्यैतद्रूपम्॥ गनाविति किम्॥ यतोजातः प्रजापतिः॥ यदाएतद्रूपम्॥ पायोर्विशः॥
पायुशब्दात्परोविशशब्दोन्तोदात्तोभवति॥ यथा॥ भ्रवापायुर्विशोअस्याअदब्धः॥ पायोरि
तिकिं॥ इंद्रंदेवीर्विशः॥ आयुरर्यमोर्वशीभ्यः॥ आयुरित्येतत्पदं॥ अर्यम॥ उर्वशी॥ इ
त्तिशब्देभ्यः परमन्त्रोदात्तंभवति॥ मानोमित्रोवरुणोअर्यमायुः॥ उर्वशी॥ उर्वशास्याः यु॥
पदसंहितोदाहरणं॥ अस्ति॥ अथस्मतेव्रजनंक्षममस्ति॥ आयोः॥ एतेभ्यइतिकिं॥ आ
युश्चमेजराचमे॥ अस्यरोचनासोवोधामेपारंपुरएतारोदिवः कोहंत्वंमंहीयईशईशाने
भ्यः॥ रोचना॥ असौ॥ वोधामे॥ पारं॥ पुरएतारः॥ दिवः॥ कः॥ अहम्॥ त्वम्॥ मंहीमयः ईशो
यह्वीम्॥ यईशानम्॥ एतेभ्यः॥ परः अस्यशब्दः॥ अंतोदात्तोभवति॥ रोचनाअंतश्चरतिरो ३६
चनास्य॥ असावस्यपितावयं स्याम॥ वोधामेअस्य अस्यवचसः॥ पारीअगन्मतमसस्य

रमस्य पुरएतारः येब्रह्मणः पुरएतारोअस्यादिवः एकेनांगेन दिवोअस्यपृष्ठम्
क कोअस्यवेद भुवनस्यनाभि अहं वेदाहमस्यभुवनस्य त्वंब्रह्मणस्पतेचमस्य
मंही इमन्त्रेधियंघृतेरमंहोमंहीम् स्य यईशेअस्यद्विपदश्चतुष्पदः ईशानं ई
शानमस्यजगतः अन्तोयज्ञस्यहविषःपाहीत्यानंमधोयजमानस्य होतुरजरासो
लोकेषुग प्रन्नो यज्ञस्य हविषः इत पातं मधः यजमानस्य होतुः अजरासः
प्रन्नो यज्ञस्य हविषः इत पातं मधुः लोकः इत्येते परेभ्यअस्यशब्दोअंतोदात्तोभव
ति पन्नो अस्यप्रज्ञामानुषुत्तं यज्ञस्य आयज्ञस्योदयः हविषः अस्यहविषकत्वना
यज पाहि शश्वत्तमं स्वमनाअस्यपाहि इतः अस्येदिंशेवावृधेपातम् अस्यपा
तंधियेषितामधः अस्यमधःपिवतमादयध्वंयजमानस्य आस्ययजमानस्यहोत
जायत होतुः अस्यहोतुःप्रदिश्वतस्यवावि अःजरासः अस्या जरासोदमान॥

Indira Gandhi National
Centre for the Arts

प्रा लोकः स्वतावतः॥ अनुदात्तमनपत्॥ अस्येत्येत्यस्यकादन्यदनुदात्तंभवति॥ प्रङस्यवि
शा ष्टाः शतम्॥ अथातस्य॥ पूर्ववानुदेशइत्यस्येवायंप्रपंचः॥ पत्नीर्हसंयोरत्रअनुदात्तत्वा
३० दिर्घोपत्नीशब्दस्यसदृशब्दस्यवानुदात्तोभवति॥ आ दिर्वोनुदात्तोस्वरइतिविकल्पः॥
पत्नीः॥ यथापगन्पत्ना॥ पृश्निस्नूः॥ दमाह्यष्टइंष्ट्रांस्तिरित्युनार्थम्॥ र आनंदपुरवास्त
व्यंभट्टवज्रटसुतउवटकृतौप्रातिशाख्यभाष्येद्वितीयोध्यायः॥ ॥ ॥ ॥ ॥
संहितायाम्॥ स्वरसंस्कारयोश्छंदसिनियमइतिप्रतिज्ञातम् तत्रप्रथमेध्यायेस्व
रसंस्कारयोरेवाङ्गभूताः संज्ञापरिभाषाउक्ताः द्वितीयेस्वराः॥ अधुनाक्रमप्राप्तः सं
स्कारोभिधीयते॥ लोपागमवर्णविकारप्रकृतिभावलक्षणः॥ संहितायामित्यधिका
रआसमाप्ताध्यायपरिसमाप्तेर्यदितऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवंतद्वेदि ३०
तव्यम्॥ वक्ष्यति॥ उदस्तभानेलोपम्॥ उत्तस्तभान॥ उत्तभान॥ तेजसादिशअर्थंपदम्

संहितालक्षणमुक्तम् वर्णानामेकप्राणयोगः संहितेति अधुनापदलक्षणमुच्य
ते अर्थाभिधायिपदम् पद्यतेगम्यतेज्ञायतेनेनार्थइतिपदम् यद्येवंनिपातस्यान
र्थकस्यपदसंज्ञामनप्राप्नोति नैषदोषः उपरिष्टादर्थभेदनिबंधनंपदचतुष्टयंवक्ष्य
ति तेनास्यपदसंज्ञाभवति यथा क्रियावाचकमाख्यातमुपसर्गोविशेषकृत् सत्वाभि
धायकंनामनिपातःपादपूरणः इति सूत्रकारस्यायमित्यभिप्रायः पदप्रतिरूपक
स्यपदावयवस्यपदसंज्ञामाभूदित्यर्थग्रहणम् इहैवपदसंज्ञायथास्यात् गोव्याघ्रमन
कायगोघातमिति [illegible] गोधूमाश्विम पदान्तापदाद्योः संधिः यः कश्चिदिहशा
स्त्रेसंधिरुच्यते सपदान्तपदान्तयोर्द्रष्टव्यः नैवलाभवति स्वरयोः व्यंजनयोः स्व
रव्यंजनयोःव्यंजनस्वरयोः इदिप्रकाराः स्वराः पूर्वाभवंतिपश्चाद्व्यंजनानिव्यंजनानिवा पूर्वाणिपश्चा
त्स्वराइति स्वरयोर्भवति आ इदम् एदम् वरुण इह वरुणेह व्यंजनयोर्भवति सम्

Indira Gandhi National
Centre for the Arts

प्रा
शा
३८

योमि॥ संयोमि सम्॥ वपामि॥ संवपामि॥ स्वरपूर्वोभवति॥ इघेला॥ इघेला॥ ऊर्ज्जो॥ त्वा॥ ऊर्ज्जो
त्वा॥ व्यंजनपूर्वोभवति॥ ऋतं॥ एतं॥ उदेनम्॥ परिभाषासूत्रमेतत्॥ न परकाल॥ पूर्वकाले
पुनः॥ अनन्तराः कालाइतिवक्ष्यतितत्रयः परकाल॥ संधिः सपूर्वकालेसंधौपुनर्नाप्रवर्त्त परकालसंधिं
भवति॥ यथाआकारोपधीयकारमिति॥ नकारस्याकारोपधस्ययकारोविहितः स्वरप्रत्य
ये॥ महांयिन्द्रति॥ तथाकंरपूर्वोयकारमरिफित॥ इति॥ अपूर्वस्यविसर्जनीयस्यय
कारोविहितः स्वरेप्रत्यये॥ यथा॥ यार्इधीरिति॥ ततोद्विशाखात्परंलक्षणमुक्तं॥ यवयोः॥
पदांतयोः स्वरमध्येलोपइतिततोयलोपेकृते द्विशाखात्पूर्वंशास्त्रंपुनः प्रवर्त्तते॥ कंघा
वद्भि वर्णएकारंउवर्णउकारमितिततः प्रवर्त्तमानंनिषिध्यातइतिसूत्रार्थः॥ अनन्तराः॥
कालाः द्विकासेअन्तरायेषांसंधिकालानांनित्यंनराः॥ कालशब्दः स्थानपर्यायः उक्त ३८
मुदाहरणम्॥ विसर्ज्जनीयः॥ विसर्ज्जनीयसंधिरधिकृतइतिसूत्रार्थः॥ चछयोःश

संहितालक्षणमुक्तम्॥
वर्णानामकपालयोगः॥ विसर्ज्जनीयः॥ विसर्ज्जनीयसंधिरधिकृतइतिसूत्रार्थः॥ चछयोःश
संहितेति॥ अपुनापरल
क्षणमुक्तं॥ अर्थोनि
धार्यपदं॥ एकपदं॥ आ
युतं॥ गम्यते॥ अन्तना
पूर्वइति पदं॥ संहितं
नियतस्य ... 
...
...

षः॥ चकारछकारयोः परयोर्विसर्ज्जनीयः शकारमापद्यते चकारेभवति वाजःच वाजश्च
मे छकारेभवति अग्नीवयः छंदः अग्नीवयश्छंदः तथायोःसम्॥ तकारथकारयोः
परयोर्विसर्ज्जनीयः सकारमापद्यते तकारेभवति श्रावःतविद्यातत्[illegible]॥
अतएवकृपोदाहरणांदीयते कः थकारः यः थकारः वस्थकारः परसवर्णास्तु द्विशा
कटायनः शषसास्तस्मिन्तकारका॥ सत्संस्तेषु परभूतेषु परसवर्णंविसर्ज्जनीयआप
द्यते शाकटायनस्याचार्यस्यमतेन आशुःशिशुः शिशानः आशुश्शिशानः अदितिः
षोडशान्तरेण देवः वःसविता देवोवस्सविता अविकारः शाकल्यः आपदेषु विस
र्जनीयस्याविकारंमन्यतेशाकल्यः शषसेषुपरभूतेषु आशुःशिशानः अदितिःषोड
शान्तरेण देवोवःसविता अत्र[illegible]दर्योः पफयोश्च प्रकृत्याविसर्ज्जनीयस्मृते कख
योः पफयोः परभूतयोश्च शाकल्यः कपयोर्भवति विष्णोःक्रमः विष्णोःक्रमोसि ततः

Indira Gandhi National
Centre for the Arts

विसर्जनीय॥विसर्जनीयसंधि [redacted]

था
ना
२५

खनेम॥ [redacted] पफयोर्भवति सवित:प्र॥देवस्तविसत:प्रसुव॥या॥फलि
ली॥या:॥फलिनीर्या:कखयो:॥पफयो:पफयोश्चेतिपृथक्समासकरणंउत्तरार्थम्॥जिह्वा
मूलीयोपध्मानीयौशाकटायन:॥जिह्वामूलीयोपध्मानीयौविसर्जनीयश्चापद्यते॥यथा
संखम्॥कखयोर्जिह्वामूलीयमापद्यते॥पफयोरुपध्मानीयं॥शाकटायनस्याचार्यस्यमते
न॥विसर्गक्रम:तनूपवनेम॥वसोघ्रविश्रम्॥यष्किलिनी॥ [redacted] ॥लुङ्मुडिजित्परे॥सु
तसंज्ञका:शषसा:॥जिसंज्ञकावेतौप्रथमौ॥शषसाश्च॥तत्रशषसेषुप्रत्ययवर्णमितिव
र्ज्जनीयसंधिकरणत:॥अतइद्धदशैवजिसंज्ञकाह्यद्यते॥लुङ्मुक॥लुप्यतेविसर्जनीयोमु
तसंज्ञकेजित्परेपरत:॥यथा॥अंध:स्थ॥अंधस्थ॥स्थालीभि:स्थाली:॥स्थालीभिस्थाली:सु
डिजित्परइतिकिम्॥स्वस्तिनुस्तार्क्ष्योअरिष्टनेमि:॥स्वस्ति॥उपवसनेपीव:॥उपवसने २५
प्रत्ययेपीवशब्दसंबंधीविसर्ज्जनीलुप्यते॥यथा॥पीव:॥उपवसनानाम्॥पीवोपवस
यो

रणेतया अवग्रहस्तुवर्ज्जायामितिनातोपदिश्यते॥२॥ककारपकारयो:सकारं विसर्ज
नीयोधिकृत:सयथादिष्टंककारपकारयो प्रत्यययो:सकारमापद्यते यद्यप्यत्रावि
शेषेण सकारउक्तस्तथापिकंव्यपूर्वस्येतुसकार: अकंव्यपूर्वस्यतुषकारोभवति:
यत:कधीत्यक्षयोसकारमितिअकंव्यपूर्वस्यषकारंविदधाति अतोअकंव्यपूर्वस्यष
कारोभवतितिनिश्चीयते भास्करयो:सकारं भास्वनेरोविसर्जनीय:षकारं भास्वतेरो
विसर्जनीय:षकारमापद्यते ककारपकारयो:प्रत्ययो:कंव्यानेरस्यतुसकारएव पत
योरुदाहरणानिअग्रेउक्तान्येवद्रष्टव्यानि अधिकारसूत्रमेतत् आधिकारसूत्रमेत
आसिर्निविडअत्यावसानिर्वत्तानिर्वचिय: आवि: नि सूड: इस्थावाजनिर्गति: इत्ये
तेषांसंबंधीविसर्जनीय:सकारषकारावापद्यते यथायोगम् ककारपकारयो:प्रत्य

Indira Gandhi National
Centre for the Arts

प्रा
शा
७९ योः परयोः॥ आवि॥ आविरुग्रदेवान्पग्ने॥ निः॥ अंबनिष्परसमरीर्विदाम्॥ इडा॥ इडस्पदे
समिध्यसे॥ इडायाः॥ इडायास्पदमसि॥ वसतिः॥ पर्णेवोवसतिष्कृता॥ वरिवः॥ अयन्नो
अग्निर्वरिवस्कृणोतु॥ दिवोककुत्पृथिव्या॥ दिव इत्यस्यसंबंधीविसर्जनीयः सकारमा
पद्यतेककुत्पृथिवीशब्दौवर्जयित्वादिवः॥ प्राय॥ दिवस्पुत्राय॥ दिवःपृष्ठे॥ दिवस्पृष्ठे
वावचस्वतीम्॥ अककुत्पृथिव्योरितिकिं॥ अग्निर्मूर्द्धादिवः ककुत्॥ दिवः पृथिव्याः
रायः सहसस्पोषपुत्रयोः रायः सहसइत्येतौविसर्जनीयौसकारमापद्येते॥ यथासं
ख्यम्॥ पोषपुत्रयपयोप्रत्यययोः॥ रायः॥ पोषेण॥ रायस्पोषेणवियोष्म॥ सहसःपुत्रः
सहसस्पुत्रोअद्भुतः॥ तमसोऽपरस्तात् तमसइत्ययं॥ विसर्जनीयः सकारमापद्य
ते॥ परस्तात्कृष्णस्त्वा॥ तमसःपारं॥ तमसस्पारमस्य॥ अपरस्तादितिकिं आदित्य ७९

वर्णंतमसः परस्तात् तपसस्पृथिव्यं तपसइत्ययंविसर्जनीयः पृथिव्यांप्रत्ययेसकारमा
पद्यते धन्नोदिवोविभातितपसस्पृथिव्यां अध्वनोरजसोरिषस्पृशस्पातौ अध्वनः रजसः
रिषः स्पृश एतेविसर्जनीयाः पातौसकारमापद्यते अध्वनः यथा पूषाध्वनस्पातु र
जसः रजसस्पात्यन्नो रिषः सनोदिवासरिषस्पातु पातावितिधातुग्रहणं अतइहापि
भवंति पुरुराज्ञोदेवरिषस्पाहि स्पृशः पाहि स स्पृशस्पाहि अध्वनस्कुर्विति च अ
ध्वनइत्ययंविसर्जनीयः कुरुइत्येतस्मिन्परेसकारमापद्यते यथा सकामा २३ अध्
नस्कुरु समानपदेच एकस्मिन्पदेयोविसर्जनीयः सकारपकारयोः प्रत्ययोसकार
पकारावापद्यते यथाश्रेयःकारश्रेयस्कारश्रेयस्कार आयुःष्याः श्रधामस्तुतमायुष्माः य
स्वामे अवस्यनेपरियंतस्मिन्पदेधत्तनसंबंधीविसर्जनीयः सकारमापद्यते वेषधयः
परि दिव वेषधयस्परि अवसानइकिं त्वमग्नेहेडःपरितेपृणक्तु कविः सइधानोव

कविःकारत्पृथिवी कविः ... संबंधीविसर्जनीयःसकारमाप
द्यते॥

Indira Gandhi National
Centre for the Arts

पा शा ७९ स्तकृविः॥ कारत्॥ यथानोवस्यस्कारत्॥ कृधि॥ प्रबुधेनः पुनस्कृधि॥ कृषीवकृधोसकारं॥ कृ
धोचप्रत्ययेकृषीरित्ययंविसर्जनीयःसकारमापद्यते॥ कृषीःकृधि॥ उतस्या॥ कृषीस्कृधिन
उकविष्करकृधिष्विति कृधोसकारः प्राप्तः॥ किमनेनसूत्रेणक्रियते॥ एवंतर्हि अकंषेव्योप
धस्यषकारोभिप्रेतःसमाभूदितिसकारवचनं॥ एतस्माद्यत्नात् एकादकंव्योपधःषकारमाप
द्यते॥ इत्येतदध्यवस्यामः॥ सदोद्योर्न्नमस्कृतपितापथ्येषु॥ सदः॥ द्यो॥ नमः॥ एतेषांसंबंधीवि
सर्ज्जनीयोर्थयथासंख्यंकृतंपितायथाइत्येतेषुप्रत्ययेषुसकारषकारावापद्यते॥ सदः॥ कृ
तं॥ येषांमरुसदस्कृतं॥ द्योःपिता॥ उपहूतोद्योष्पिता॥ नमः॥ पथ्ये॥ विश्वायुःशर्म्मसप्रथा
नमस्पथ्ये॥ पतितालव्यास्वरोग्ह्ये॥ पतिशब्देतालव्यस्वरोदयेप्रत्ययेपरेअधस्तनपदसंबधी
विसर्जनीयःसकारमापद्यते॥ वाचः॥ पतिम्॥ वाचस्पतिविश्वकर्माणम्॥ ब्रह्मणः॥ पते॥ ब्रह्म ७९
णस्पतेत्वम्॥ वाचः॥ पतये॥ वाचस्पतये॥ पदेच॥ पतिशब्देचपदेएतद्भवति॥ नपदावयवे य

नानाम् सर्वेवधीनयोः सपदसंबंधीविसर्ज्जनीयर्उषधिइमइत्यनयोः प्रत्यययोर्लुप्यते॥
सः ईषधीः सोषधीरनुरुध्यसे सः इमाम् सोमाचोदयदान्नं व्यंजनेच व्यंजनेचपरिसप
दसंबंधीविसर्जनीयोलुप्यतेः सनः सनोबोधिश्रुधीदवम् सः जायसे सजायसेमथ्य
मानः व्यंजनइतिकिम् सःअग्निः सोअग्निर्यः [illegible]॥ स्यएषपदयोःसंबधीविसर्ज्ज
नीयोलुप्यते व्यंजनमात्रे स्यःराध्यः एषस्यराध्योवृषा स्यःवाजी एषस्यवाजी एषः क्रा
ताःपुरोअश्वेन निशब्दोबहुलं निशाद्यः परतीयोबहुलंलुप्यते श्रृंगा श्रृंङ्गाणीनिशा
न्नेनिशब्दोन्लुप्यते चनाविश्रृङ्गानवःपरानेनिशान्ते श्रीणिपदाविचक्रमे बहुलग्रहणा
त्क्वचिन्नवलोपोभवति नामानि एतानिअस्त्रेनामानि इकारमात्रस्यभवति एमन् नास्या
ःनि एमन्नीतिशब्देनकारस्यभवति इष्कर्तारमध्वरस्यंनिष्कर्तारमितिशब्दे इकंभूतपदाद्यन्त
प्रत्ययंस्वङ्गुग्रहणम् अनित्यःध्याये अस्मिन्नध्यायेशेषयत्नःपरेआमाविकाराअवस्य

Indira Gandhi National
Centre for the Arts

प्रा
ला
४९

ते।तेअनितोऽइतिकरणेपरत्रावस्थितेनभवंतीतिस्रूस्त्रार्थः॥ यथा॥श्रेयस्कर॥श्रेयःकरोतिश्रेयःकर॥
च श्रीतपा॥चत्तः॥पाडतिस्त्वर्णाम्मस्वःसामि॥धूर्याहो॥धूःसाहावितिहद्वंडभः॥ड्ढंभइति
वनर्षद॥वनसदइति॥अवरस्पराय॥अवरपोरायेति॥स्वमंड॥स्वचंडेति॥उर्ध्तन॥उर्ध्व
त्नन्निति॥स्वघाव॥स्वसावेति॥पुरीषद्वाण॥पुरीषवाहनइति॥मामहान॥ममहानइति
दृष्टिमा॥इव॥दृष्टिमानिवेति॥अथायदोषइतिकिमतंनवक्तरमितितवःतरम॥अत्रइति
करणेपरत्रावस्थितेसकारोविद्यतएव॥[redacted]इतिवर्त्रचर्चायाम्॥इतिक
रणात्परातोयत्पुनःपदव[redacted]चर्चा॥छन्दोनोच्यतेतत्रइतिवत्॥इनाविव॥यथाइकर
णपरत्रावस्थितेआगमाविकाराश्चनभवन्ति॥एवमिहापिनभवन्ति॥यथा॥श्रियःकरःचत्तः
पाःस्वःसाम॥धूःसाहोडः॥ह्मः॥वनसदः॥अवरःपराय॥स्ववंड॥उधुत्नन॥स्वसाव॥पु ४९
रीष॥वाहनः॥मामहान॥दृष्टिमान॥इव॥एवंद्याद्य॥लोपागमविकारः॥स्पर्शयेतिक

ध्या वावः पतिंवाचस्पतिम पदइति किम् यतोजातःप्रजापतिः परमेष्ठ्यभिधीतः प्रजा
पतिः नपकष॥पकषि पकषइत्ययंविसर्ज्जनीयः पकषिप्रत्ययेनसकारमापद्यते प
कषः घकषमणि समानपदेवेतिप्राप्तस्यनिषेधः वाजपतिर्वामणदिधिषुरत्नः पर्शव्ये
नोन्नः पार्श्वमितिच॥ वाजपतिः वाम॥ एदिधिषुः अन्नःपर्शव्येन अन्नःपर्शव्येन अन्नः
पार्श्वम॥ एतेषुविसर्ज्जनीयःप्राप्तेनसकारषकारवापद्यते वाजपतिः परिवाजपतिःकविः
कविःकादितिप्राप्तिः वामःपत्नीलीन॥ एदिधिषुःपतिम॥ समानपदइत्युभयोःप्राप्तिः य
था अन्नःपर्शव्येनोथ अतःपार्श्वमहादेवस्य अहःपतीपुकाम्॥ अहरित्ययंविसर्ज्जनीयः
पतिजह्नेरफमापद्यते अहइत्यतयेमाहात्समानपदइतिप्राप्तस्कारेतदपवादोरफः पञ्च
म्युदर्शनम इतनतरलोपागमविकारास्त्यान॥ तेताव॥भविष्यति परश्चषर्द्धयमापद्यते॥
यर्थकारस्यत्रमेतत॥ सहःमाःअहयो स्वः धूः एतौविसर्ज्जनीयोरफमापद्येते यथा॥

Indira Gandhi National
Centre for the Arts

ख्यम्।।२ ऋहयोः प्रत्ययोः परश्च मूर्द्धन्यम्।। यथा।। स्व।। सामस्वर्षामपंक्तिहुज्जनस्य।। धू।। सहो
प्रा उस्त्वावर्तं धूर्षाहो उकारं ढ ह्रे ढ इत्ययं विसर्जनीय उकारमापद्यते।। ह्रकारे प्रत्यये।। उकारात्पर
शा श्च दंत्यो मूर्द्धन्यमापद्यते।। ड।। दभः।। परितहृ उभ।। नाशे।। नाशे च प्रत्यये ढ इत्ययं विसर्जनी
७२ य उकारमापद्यते परं च उकारान्मूर्द्धन्यमापद्यते।। यथा।। ढ।। नाश।। दूणाश।। स्वष्णुस्तु दासद
णाम्।। पुरो दाशो पुर इत्ययं विसर्जनीयो दाशे प्रत्यये उकारमापद्यते।। परश्च मूर्द्धन्यम्।। अत्र रूप
सिद्धिः।। विसर्जनीयादेशस्य उकारस्य उपधाकारस्य च उवर्णे ओकारमिति।। एकादेश ओकारः
ततः परस्य दकारस्य डकारः।। पुरोडाशो हवींष्या।। अनसो वाहे सकारो डकारमम्।। अनः।। श
ब्दस्य।। तस्य वाहे प्रत्यये सकारो डकारमापद्यते।। यथा।। अनस्।। वाहम्।। अनड्वाहमन्वार
भामहे।। ओकारमितः सिंचतौ सोपधः।। इतः।। शब्दसंबंधी विसर्जनीय उपधासहित ओकारमाप ७२
द्यते सिंचतौ प्रत्यये यथा।। इतः सिंचत परितो षिंचतास्व तम्।। षड्दशदंत्ययोः संख्यावर्जयोर्य

षोश्च षडित्येतस्य शब्दस्य वशब्दार्णः सोपध ओकारम् पद्यते दशदंतयोः प्रत्ययोः यथासंख्यं
संख्यावयोभिधाकयोः यथा षड् दश षोडश च मे षड् दन्ता अस्येति षोडन्तः एतच्च शिष्य
व्युत्पत्त्यर्थम् न संहितायामुत्तरपदगणं लभ्यते तत्र आशाङ्नाङ्दारात् आद्याशब्दात्परस्तकारः
परश्च मूर्द्धन्यमित्येतेन मूर्द्धन्यमापद्यते सचेदास्याशब्दः आङ्वरशब्दात्परो न भवति ह्रक आ
धातः कालकादीर्घाघाटः अनाङ्वरादिति किम् शब्दायाङ्वराद्यातं वनसैदाविदेदिषेण व
नद्यांसदशब्दे प्रत्यये रेफेणाव्यवधीयते तवहृनशब्दः वेड्शब्दात्परो न भवति किं बर्हिषदे
वेड्नसदे वेड् पतेरेकसकारेण पतिशब्दे प्रत्यये वनशब्दः सकारेणाव्यवधीयते वनःप
तिः वनस्पतिशमिता ऋतावनिवपतिपरयोः ऋत अवरशब्दौ वसकारेणाव्यवधीयते य
थासंख्यं पतिपरयोः प्रत्यययोः ऋत पते ऋतस्पतेत्यष्टुः अवरपरा अवरस्यायं था
एधाम् तहृदृतोकारपतोताल्लोपश्च ततहृहत षमैशब्दोकारपतिशब्दयोः प्रत्यययो

Indira Gandhi National
Centre for the Arts

प्रा
श्रा
७७

र्यथासंख्यसकारेणाव्यवधीयेते॥ पूर्वपदस्योश्चतकारलोपोभवति॥ तत्करम्॥ तमसेतस्करम्
तत्करान्॥ तस्कराउत्॥ इहत्॥ पतिः इहस्पति॥ परिष्ठते षकारेण॥ परिशब्दः ष्टतेप्रत्ययेष
कारेणाव्यवधीयते॥ परिष्कता॥ परिष्कता॥ श्रुकाः॥ चंद्रेस्तु शकारेण॥ चंद्रप्रत्यये स्तु शब्दः श
कारेणाव्यवधीयते॥ स्तु चंद्र तुभेस्तु श्चंद्रसर्पिषः॥ उधुत्तनधी दकारम्॥ उधुत्तन्नित्येतस्य
शब्दस्यधकारोधकारमापद्यते॥ सहस्वधारां इहतीरुडत्तन्॥ भाविभ्यः स्वषट्समानपदे॥ अर्क
वोभावीत्युक्तं॥ भाविभ्यउत्तरः सकारः षकामापद्यते॥ एकपदस्थौचेन्नाविसकारोभवतः॥ गो॥
स्थानम्॥ व्रजन्नक्कगोष्ठानम्॥ परमे स्थी॥ परमे व्यभिधीतः॥ स्वसाव स्वषावसोममज्जिभिः
सीसधाम॥ भुवनासीषधाम॥ भाविभ्यइतिकिं॥ ध्रुवसदंत्वा॥ समानपदइतिकिं॥ विसीमतः॥
स्तरुवः॥ अनुस्वाराच्चतत्पूर्वात्॥ अनुस्वाराच्चपरः सकारः षकारमापद्यते॥ तत्पूर्वात्॥ भाविपू ७७
र्वात्॥ तपूं २ ष्यमे॥ हवीं २ षि॥ पुरोडाशो र्हवीं २ ष्या॥ तत्पूर्वादितिकिं॥ उत्सत्वनाम्नामका १

नाम्मना॥ सिकारेफाभ्यांच ककाररेफाभ्यांच्चपरः सकारः षकारमापद्यते ककाराद्भवति ि
क स्तु अभितोदिस्तुश्रिताः ऋक स्तु ऋत्तु रेफोद्भवति गीः स्तु गीर्षु धूः स्तु धुर्षु नन्तु
वः यत्रवदकारोन्यथाश्रुतं पदंकरोति अन्यथावाषीसंहितातत्रैवलक्षणकर्तुंयुज्यते य
था स्तुषाव स्तु सावयत्र तत्रइहकारस्यआर्षो: संहितायाश्चपदवावयंतत्रलक्षणनघट
ते आकारणम्यदसंहितेषु सत्यमेवंयादिनामप्रसंगास्तु पजीवतावार्योणाशिष्यसुत्पत्यर्थंक
स्मिन्नाकाणालदपदमासंजितः पर्वाहिसंहितायानविद्यनानेषुबोधादिषु लक्षणंदष्टव्यम्॥
अथवा यथा यथाहरस्यमधाहरणम् उत्काहारस्यकानाहरणम् पुष्यादारस्यफलाह
रणम् एवमनदपि एवंक्रान्त्वा अवाधपदेशि नेः मिनेः नेःपरस्यसीदतेः सकारः षकार
मापद्यते नि षीदत पदेवहिर्निषीदत अप्रभानपदार्थेओनं समानदः नेःपरःसना
दताश्चस्यसकारः षकारमापद्यते यथा नि सभादः निषभादः ओंकारात्तु ओंकारात्परस्य
ः स्वुकारः षकारमापद्यतेयथा मो स्तनः मोष्टूणः कं वाष्टकान. एकवर्णपदमष्टकानिप्र

Indira Gandhi National
Centre for the Arts

नं॥ अष्टन्तसंज्ञा हकारात्परस्तकारः षकारमापद्यते॥ यथा॥ ॐ इति॥ ऋष्टुत्वष्टुणा॥ अभेस्था॥ अभेरु
प्रा पसर्गात्स्थपरः स्तः षकारमापद्यते यथा॥ अभि स्तः॥ अभीष्टुणाः साधीनां॥ परेः सिंचते॥ परेरुप
शा सर्गात्परः॥ सिंचते सकारः षकारमापद्यते॥ यथा॥ परि॥ सिंचंति॥ परिषिंचति॥ अभे॥ अभेरुपस
७५ र्गाडत्तरः॥ सिंचते सकारः षकारमापद्यते॥ सं हितायाम्॥ अभि॥ सिंचामि॥ अभिषिंचाम्यसौ॥ २
अव्यवहितोपि॥ अकारव्यवहितोपि॥ अभेरुपसर्गाडत्तरः सिंचतेः सकारः षकारमापद्यते॥ सं हि
तायां॥ याभिर्मित्रावभ्यषिंचन्॥ वेर्युदय॥ वेरुपसर्गा~~त्~~ ~~वेरुपसर्गा~~डत्तरः यकारोदय॥
सकारः षकारमापद्यते॥ सं हितायां॥ वि॥ स्यामि॥ विष्याम्यायुषोनमध्यात्॥ यकारोदय इति
किं॥ विस्वः पश्यव्यंतरिक्षं॥ हिर्मयोदयः॥ हिशब्दाडत्तरः सकारः मकारोदयस्य ~~सकारोस्य~~ षका
रमापद्यते॥ सं हितायां हिस्म अस्ति हिष्मा तो हि॥ स्या॥ आपो हिष्ठा मयोभुवः॥ षवेस्थ॥ षविशब्दा
त्परः सः षकारमापद्यते॥ मकारयकारयकारयोः ~~...~~त्ययोः॥ सं हितायाम्॥ षवि ७५
स्थ॥ ये अन्तरिक्षेय उपधविष्ट॥ नेस्त्यास्तनोः॥ नेरुपसर्गात्परयोः स्त्यास्तनोर्धा~~...~~तः सकारः षका

।

रमापद्यते सं हितायाम्॥ निं स्त्यायताम्॥ निष्ट्यायतां॥ निः स्तनोहि॥ निष्टनिहि इति॥ तत
स्तोततत्त्वरित्येतस्मिन्नुत्तरे नेरेवोपसर्गसंबंधी विसर्जनीयः सकारः षकारमापद्यते॥ निः ततरस्तः
स्वधयानिष्टतस्तः॥ अनोस्तवन्याम्॥ अनोरुपसर्गात्परः स्तौति सकारः षकारमापद्यते॥ सं
हितायाम्॥ अनुस्तवन्ति॥ अनुष्टुवन्ति पूर्वथा॥ डः षभ्राम्॥ निपातस्त्वमेतत्॥ आविर्भूत उत्तर
स्य षत्वमुक्तोसमानयदे॥ इहत्वविसर्जनीयेन व्यवधानात्॥ नप्राप्नोतीत्यतः षत्वं निपात्य
ते॥ संहितायाम्॥ डः सभ्राम्॥ डः षभ्रा॥ एव॥ देवाः हमाकिः वदतः॥ माकिरित्यनयोर्विसर्ज
नीयस्य सकारः षकारमापद्यते सं हितायाम्॥ तथायोः समिति विसर्जनीयस्य सकारस्तत्काल
स्येव षत्वम्॥ देवाः॥ न देवाः कष्टनन्वम्॥ माकिः ते माकिष्ट्व्यचिरादयष्ट्वीत्॥ सदः संहि
तायाः॥ एतदपि नियातनस्तत्वम्॥ अभावि पूर्वात्॥ षकारो न प्राप्नोति स निपात्यते॥ टतना
स्थाय टतनाषाह्याय वः॥ सधिरष्युरस्मितिः॥ साधिः अष्टुः अहिति॥ एतेषां विसर्जनीयस
कारः षकारमापद्यते सं हितायाम्॥ सधिः तव॥ सधिष्टवसौषधीः॥ अष्टुः ते॥ अष्टुष्टे॥

Indira Gandhi National
Centre for the Arts

पा
शा
५६

व॥ अहितिः॥ त्वा॥ अदितिस्त्वादेवी॥ वायुरग्निरग्नेरेकाक्षरे॥ वायुः॥ अग्निः॥ अग्ने॥ एतेषां विसर्जनी
य। सकारं मारमापद्यते एकाक्षरे पदे प्रत्यये॥ वायु॥ ते॥ वायुष्टेधिपतिः अग्नि॥ ते॥ अग्निष्टेधिपतिः
अग्ने॥ त्वा॥ अग्ने त्वास्येन॥ एकाक्षर इति किम्॥ अग्निः॥ तिग्मेन॥ अग्निस्तिग्मेन शोचिषा॥ अग्ने॥ त
नू॥ अग्ने तनूरसि॥ सकारपरेव॥ सकारः परो यस्मात्॥ एकाक्षरात् तयोन्न॥ तस्मिन्नेकाक्षरे
चा॥ याह्वाद्यस्तन पदसंबंधी विसर्जनीय सकारः षकारमापद्यते संहितायां॥ बृहस्पति॥ त्वा॥
बृहस्पतिस्त्वा स्तुन्नेरत्वात्॥ [illegible] सकारपर इति किम्॥ विस्तुस्त्वा क्रमा
ताम्॥ सवितुस्त्वा प्रसवे॥ मातृभिरर्च्चिभिः पायुभिर्वरुत्री॥ मातृभिः॥ अर्च्चिभिः॥ पायुभिः॥ व
रूत्री॥ एतेषां च पदानां विसर्जनीय सकारः षकारमापद्यते॥ एकाक्षरे प्रत्यये॥ संहितायां॥ मा
तृभिः॥ त्वम्॥ मातृभिष्ट्वम्॥ अर्च्चिभिः॥ त्वम्॥ शिवेभिरर्च्चिभिष्ट्वम्॥ पायुभिः॥ त्वम्॥ पायुभिष्ट्वम्
वरुत्रीः॥ त्वा॥ वरुत्रीष्ट्वा देवीः॥ षात्तयो मूर्द्धन्यम्॥ षकाराद्[illegible] तकारं यकारो मूर्द्धन्यमापद्यते ५६
विकारीय यासन्न मिति परिभाषितत्वात्॥ तकारस्य टकारः॥ यकारस्य ठकारः॥ वरुत्रीष्ट्वा॥ त्वष्टा

न
सा॥ ख्येरेष्टः॥ ७ प्रकृत्या नानापदस्थः सकारोऽङ्गत्वं प्रकृत्या सकारो भविष्यति समानपदस्थः
नानापदस्थे तयः प्रकृतिभावः समकारः प्रत्येतव्यः अपावादसूत्रमेतत् अनुमन्तनोत्तष्ट
कृष्यतिस्तुतस्य स्तुसमिधाय स्तुमहत्शंमभिसत्वाभिसंविशन्ति स्तुमस्या अतिस्थूलं स्तुम
लेपत्नी मंयाज्ञात् श्रात्तस्थलानि मन्थोदिविस्पृशं हृदि दिस्पृशा इंदि इंसीक्ष्वंवतामयो
नर्ध्वनोनाम्यानित्रिरिः सीसेन सीसाः सीसंपत्तुमनिमोसनिः प्रतिसह हूधनित्रिसहदास
सुतन्वि इत्यात् एतेसकाराः प्रकृत्या भवति सकारः षकारं प्राप्नोति सनिश्चिषानडति स्तु
आर्यः अनुमंतनोत्त इदंस्मिकर्मोदेवीर्दुर्बोधुस्तनोज्ञः बृहस्पतिस्तनस्य उपयामगृही
तोसिह हृस्यति स्तु नस्य स्तुसमिद्धाय स्तुमभिद्धाय शोचिषे स्तुसंदगास्तुसंहशंत्वाह
यं अभिसत्वा अभिवीता अभिवीतः अभिमत्वा अभिसंविशन्तु इंद्रमिवदेवा अभिसंविशंत
सुसस्याः स्तुमस्या कृषीस्कृधि अतिस्थूलं अतिस्थूलं त्वातिकृशं व सुसले उलूखलमुस

प्रा
प्रा
५०

ले॥ पत्नीसंयाजान॥ संयुनापत्नीसंयाजान् कृतस्थला॥ पुंजिकस्थला चकृतस्थला॥ अंजिस
का॥ श्नितिकत्तोऽजिस॥ दिविस्पृशा॥ घृतप्रतीकोवृहता दिविस्पृशा॥ हृदिस्पृशम्॥ कृतम्
भङ्ग॥ हृदिस्पृशम्॥ हि २ सी॥ मामाहि २ सी॥ एतेषांपदानांसकारोभाष्युपहितोऽत्तस्थानेन
प्रकृतिभाव॥ स्वधितोमैन २ सि २ सी॥ अनुस्वारात्रमत्पूर्वादितिप्राप्तिः॥ ऋतकामयोः॥ ऋतका
मयोः॥ ऋतकामयोः शिल्पे॥ ऋतकामाभ्यां॥ ऋतकामाभ्यां २ संतरं तोयत्तुभिः करोफाभ्यां
वेतिप्राप्तिः तितिरिः॥ तितिरिस्तेसर्प्याणांएकान्तरेसकारयस्येतिप्राप्तिः॥ एतदर्थेनवनानापदे
स्थेसकारइतिस्वत्रावतारः कृत अन्यथातित्तिरिपरःसकारोनविद्यते॥ इतिमोहःस्यात्॥ सी
सेन सीसेनत्वंमवसा॥ सीसाः॥ रजताहरिणीःसीसाः॥ सीसंसीसृसवमे॥ पशुसनि प्र
जासनिपशुसनि॥ गोसनिः॥ योगोसनिस्तस्पतइष्टयज्ञष॥ प्रतिसहृद्ध प्रतिसहृत्वा
सः प्रतिसहृत्वासएतन॥ चतस्त्रि २ शात्चतस्त्रि २ शाज्जिनःयः॥ नत्वत्रभावीसर्ज ४७

यव्यवहितः अतोनैवेहफलाइगंकाकिमनेनसूत्रेणेति एवंतर्हियेचतः शङ्काविस
र्जनीयव्यवहितास्तेषांफलंयथास्यात् एतदर्थं चतः स्तोमाः धर्त्रेचतष्टोमः ऋकार
रेफाल्लदयः ऋकारादयोरेफोदयः अतदयश्चसकारःप्रकृत्याभवति ऋकाराद
यः निस्ठभिरत्तवन रेफोदयः निस्वश्चेम अकस्यः वाचोविसर्जनं पृथिविदिव्युप
रिवर्षाणिशकुनियानिभ्यः पृथिवि दिवि उपरि वर्षाणि शकुनियानि इत्येतेभ्यो
भाविभ्यउत्तरःसकारःप्रकृत्याभवति संहितायाम् पृथिवीपृथिविसदंत्वा दिवि॥
दिविसदं उपरि उपरिसदोइन्द्रवन्तःवर्षाणि वर्षाणिसदिं शकुनिष्टदस्पति शकु
कुनिसादेनाया सिंहस्य हैं अश्ववालिसौष्ट्राः॥ ऋदयोनकारणकारः॥ समान
कारात् सोष्ट्राः॥ अश्ववालिसौष्ट्राः॥ ऋरेफोनकारणकारंसमान पदे ऋकाराद्भवति य
देः ऋकारषकाररेफा॥ भवन्तोनकारणकारमापद्यतेसमानपदे ऋकाराद्भवति पृणीम॥ एतप्रत्ययनकार॥ ऋका
था तृणां षकाराद्भवति यव्यामनीषाणां रेफाद्भवति पूर्णम एतप्रत्ययनकार॥ ऋका

Indira Gandhi National
Centre for the Arts

प्रा
शा
५८

रवकाररेफेसउत्तरा॥संतोणकारांभवति॥अयंतावत्सूत्रार्थोव्याकारणविषयःप्रदर्शना
र्थक्रियते॥स्वरयवहकपेष्वस्वरैर्यकारवकारहकारैःकवर्गपवर्गाभ्यांविहितोनकारोरेफ
ऋषकारभ्यउत्तरोणकारमापद्यते॥संहितायांच्छमानाः॥त्तृतीयमप्लवनमणाःपुरापवा
हनःत्वमग्ने॥परीषवाहणः॥प्र॥वाहनः॥विश्वरसिप्रवाहणः॥ऋषरेभ्यइतिकिं॥वह्निरसि
हव्यवाहनः॥ऋषरेभ्यइतिकिं॥वह्निरसिहव्यवाहनःसमानपदइतिकिं॥प्रबोयच्छत्वर्या
मा॥निषणायरथवाहणमिंद्रपर्णापरिणीयतेसमिद्धणउरुष्याउरुष्याणोरक्षाणःघृणः
घृणःघृणासत्यास्वर्णास्यूरिणोप्रणआयुःषि॥एतेणकारानिपात्यन्ते॥पदत्रलक्षणेनानु१
पपन्नत्तसर्वत्रिपातनात्सिद्धमेव॥निषणायस्वाहा॥अत्रद्वयोत्रकारयोर्णत्वन्निपात्यते
प्रथमस्यतवर्गेविति निषेधः॥उत्तरस्यनकारस्यव्यवहितत्वात॥नकारश्चस्वरयवहकपा ५८
नास्मध्येनपव्यते॥निषणायथ्यानि॥सन्ना॥य॥निषणायस्वाहा॥रथवाहणम॥रथ वाह

नम घकारव्यंवधानादप्राप्तिरतोनिपात्यते रथवाहण इहविरस्यनाम इंद्रएणं इंद्रः एन
म इतउत्तरमसमानपदत्वादप्राप्तिरतोणत्वंनिपात्यते इंद्रएणंप्रथमो अध्यतिष्ठत प
रिणीयते परि नीयते सोअध्वरायपरिणीयतेकविः समिद्धणः सं इद्ध नः समिद्धणो
न नसा उरुष्याणः उरुष्य नः उरुष्याणोअघायतः समस्मात रक्षाणः रक्ष नः रक्षा
णोब्रह्मणस्पते घृणः सो घृ नः सोघृणइंद्राश्वष्टत्वदेः घृणः घृनः अग्नीघृणः सरवीना
म घृणासत्यास्व नासत्या सोमदृम्नणासत्या स्वर्णाः स्वः नः स्वर्णाधर्म्मःस्वाहा अस्यूरिणो
अस्यूरि नो अस्यूरिणोगार्हपत्यानिसंतु प्रणआयूःषि प्र नः प्रणआयूंषितारिषः
आयूं२षीतिकिम भगप्रेन नन्सयगाभिवधः परिणइतिशाकटायनः परिणइतिनिपा
त्यते शाकटायनस्याचार्यस्यमतेन परिणोरुद्रस्य शाकटायनइतिकिंपरिनोरुद्रस्यहे
तिर्वृणक्त प्रजेनितुदाति हिनोमीनांप्रपूर्वाणाम प्रपूर्वाणांनेतितुदाति हिनोमि एषां

Indira Gandhi National
Centre for the Arts

शङ्खरूपाणान्नकारोणकारमापद्यते संहितायाम्॥ अत्रनेतितुदात्तोर्द्धातुग्रहणम्॥ अतःस
पूर्वःसप्रत्ययोन्नयोर्भवति॥ हिनोमीतितु विकरणनिर्द्देशं यत्रविकरणंतत्रभवति॥ नेति॥ प्र
नय॥ यज्ञंप्रणयदेवाव्यम्॥ नुदाति॥ प्र नुदन॥ अमेजातान्प्रणुदान॥ हिनोमि॥ प्रहिनो
मि॥ क्वाव्यात्मभिंप्र॥ हिणोमिहूरम॥ प्रकृत्यापदात्तौ॥ य॥ यदात्तौयोनकारःप्रकृत्याभवति॥ पि
त्हृविषिअन्नवे॥ पूषन्॥ तव॥ पूषन्नवव्रतेवयम॥ अक्रन्॥ कर्म॥ अक्रालम्मकृत॥ निवति
नसः॥ प्रयीनम्॥ नि॥ वनिनसः॥ प्रपीनूम्॥ एतेचनकाराःप्रकृत्याभवंति॥ समानपद
इतिप्राप्ति॥ नि॥ यथा॥ क्वचभूनीकाशः चनिब्रह्मवनित्वात्तत्रवनि॥ नसः॥ वाई॥ नमक्रो
प्रपीनं॥ प्रपीनमग्नेसरिरस्प॥ स्त्रीमनाइत्येके॥ अयंचनकारःप्रकृत्याभवति॥ एकेषाम॥
चार्याणाम्मतेन॥ यथा॥ श्रीमनाःशातपया॥ एकेषामितिकिम्॥ श्रीमणागोःइंद्राग्नीचि ४९
त्रभानोवार्त्रघ्नंडःघम्पंध्रुवयोनिःपुरोनुवाक्याभिःपुरोनुवाक्याश्चर्म्मन्म्त्रम्॥ इंद्राग्नी॥ चित्र

भानो वार्त्रघ्नं डःघर्म्मं ध्रुवयोनिःपुरोनुवाक्याभिः पुरोनुवाक्याःचर्म्मन्निन एतेवनका
राःसमानपदइतिप्राप्तणत्वाःप्रकृत्याभवन्ति इंद्राग्नी इंद्राग्नी इंद्राग्नोरुक्तितिम्र चित्र
भानो इंद्रायाहिचित्रभानोस्तुताः वार्त्रघ्नं इंद्रस्यवार्त्रघ्नमसि डःघर्म्मग्रपडःघम्पः
ध्रुव ध्रुवयोनिःध्रुवन्तिनिध्रुवयोनिः पुरोनुवाक्याः स्त्रवः पुरोनुवाक्यावि पुरोनुवा
क्याःपुरोनुवाक्याभ्याभिः चर्म्मन्नं साध्यभश्चर्म्मक्षम न्नर्गोद तवर्गीवप्रत्ययपदेस्व
धो स्वउत्तरोनकारःप्रकृत्याभवति न्देपनुदोनाःश्रवक्रेंद्रस्यान्त्वःषाहनेनरस्नकोर एका
राहनेनतरोनकारःन्नृकाकारेप्रत्ययेप्रकृत्याभवति विषद्मन्त्वः यतोयन्तनुप्रत्यघ्न्नः
शिशिशिवर्गाधमव्यवहितेपि शाकारलकारसकारव्यवहितःवर्गाश्चेत्मध्यमाश्चवर्ग
मध्यमाः च ट वर्गास्तेश्चव्यवहितोनकारःन्नृषेस्पउत्तरःप्रकृत्याभवति शाकारव्यव
हिताः यथा इशानोकवनः सम्राडसिकृशानः लकारव्यवहितः निर्र्हतिनिर्र्ज्जत्ये

Indira Gandhi National
Centre for the Arts

नशीर्ल्पौ सकारव्यवहित॥ यथा॥ अया॥ ३ रस्तेनवरुण॥ चवर्गव्यवहित॥ यथा॥ प्राचीनंज्यो
तिःप्रदिशा॥ अन्तश्चरतिरोचना॥ टवर्गव्यवहित॥ यथा॥ त्रैष्टुभेनछंदसा॥ आनुष्टुभेन॥ तवर्गव्य
वहित॥ यथा॥ रथिनोजयन्तु॥ आर्त्नीइमेविष्फुरन्ती॥ अमित्रान्॥ ननु शिलिस्विवर्गमध्यमव्य
६ वैतोपिइत्यनेनसूत्रेणविनापि एतैर्ऋॠर्पैर्व्यवहितऋरषरेभ्यउत्तरोयोनकारःप्रकृत्याभवति
समानपदइत्युक्तम्॥ तथाऋरषरेभ्योनकारोणकारं समानपदे॥ स्वरयवहकपेष्वेत्यादिभि
रेतैर्वर्णैर्व्यवहितोनकारोणकारमापद्यतेसमानपदे॥ स्वरयवहकपव्यतिरिक्तावर्णाश्चएते
एवशिनिस्विवर्गमध्यमाः॥ अतोनानेनसूत्रेणप्रयोजनं॥ एवंतर्हितभयथालक्षणन्तुकथ
नंशिष्यव्युत्पादनार्थाय॥ ६॥ दीर्घोविसर्जनीयइत्युपक्रम्यपदयोर्व्यञ्जनयोःसंधौयेलोपागम
वर्णविकारास्तेप्रतिपादिताः॥ अधुनास्वरव्यंजनेनसहसंधौयःस्वरस्यविकारःसउच्यते॥ ऋ ५०
स्वस्वरादीर्घमापद्यंते॥ अधिकारसूत्रमेतत्॥ अश्व॥ रश्मि॥ मति॥ स्वमति॥ स्व॥ ऋत॥ वारय

घृणि॥ सेदिमेंद्रिय धारय॥ दिशा॥ वग्रहं भंगुर वयुना॥ अस्यात्हृदयघुष्यान्नाभ वताग्रावेश
क्तिपुरु शवि वकारे॥ अश्वारश्मि मति स्वत वारय घृणि सेदिम इंद्रिय धारयविभंगु
र वयुन अश्वस्य हृदयघुष्य ऋत अभि अवत अधि अर्च शक्ति पुरु शविं एतिह्न
स्वास्वराःवकारप्रत्ययेदीर्घमापद्यते अश्व अश्वावती२ सोमावतीम् रश्मि रश्मीवती
म्भास्वतीम् मती प्रदेवायमतीविदे स्वमति स्वष्टुति२स्वमतीवृधः स्व आविद्योमीस्वत ति
प्रञ्जनाःस्वतावतः वारय समंजिवारयाद्युषन् घृणि उष्ट्राघृणीवान् सेदिम देवाना२
मत्वसुपसेदिमावयम् इंद्रिय इंद्रियावान्मदिंतमः धारय॥ बृहस्पतेधारयावसूनि वि
त्रचित्रावसो स्वस्तिते भंगुर दत्वारभंगुरावतान् वयुन विद्वान्देववयुनाविदेकइत
अश्वस्य एकस्त्वष्टुरश्वस्याविशस्ता हृदय उतापवक्तहृदयाविधश्चित घुष्य पकरन्तुघुष्या
विशस्त ऋत ऋतावानंवैश्वानरम् अभिवर्त्तःसर्विं२ श्चाः अवत इदम्मे प्रावताद्वव अधि॥

Indira Gandhi National
Centre for the Arts

पा।
शा।
५१

अधिवासंयाहिरण्यानि॥ अर्च्चेअर्च्चोविश्वानराय॥ शक्ति॥ शक्तेश्रित॥ शक्तीवंतोगभीराः॥ पुरुइमा
उत्वापुरुवसो॥ शचि॥ शचीवसोनामवसुहिरण्यानि॥ अश्ववइत्येतत्पदन्नदीर्घमापद्यते॥ हिरण्य
शब्दाश्चेत्परंभवति॥ आपस्वहिरण्यवदश्ववत्॥ अभि॥ विवेष॥ वीर॥ विश्व॥ वत्स॥ वृत्र॥ वाजय
न्नेषु॥ अभीत्येतत्पदंविवेष॥ वीर॥ विश्व॥ वत्स॥ वृत्रवाजयन्॥ इत्येषुप्रत्ययेषुनदीर्घमापद्य
ते॥ विवेष॥ स्वरभिविवेषमवीर॥ अभीवीरोअभिसत्वासहोजाः॥ विश्व॥ इमांवावमभिमभि
विश्व॥ वत्स॥ अभिवत्सन्नस्वसरेषु॥ वृत्र॥ अभिवृत्रंवर्द्धमानंपियीरुम्॥ वाजयन्॥ अपामवाज
मभिवाजयन्तः॥ अश्वस्यवाजिनइतिच॥ अश्वस्यवाजिनइत्यस्यवाजिपदस्यनपूर्वपदान्नोदी
र्घमापद्यते॥ अश्वस्यवाजिनस्त्वचिसिमाः॥ विश्व॥ सह॥ भुव॥ पुष॥ वसु॥ विश्वेत्येतत्पदं॥ स
ह॥ भुव॥ पुष॥ वसु इत्येतेषुप्रत्ययेषुदीर्घमापद्यते॥ सह॥ विश्वासाहं॥ मवसहूतनाय॥ भुवः
आर्च्चोविश्वानरायविश्वाभुवे॥ पुष॥ सुतो॥ २ ज्ञनविश्वापुषं॥ रयिम्॥ वसु॥ गंधर्वस्त्वाविश्वाव ५१

सुः नरहाभिनेषुच नराहामित्रइत्येतेषुप्रत्ययेषु विश्वशब्दोदीर्घमापद्यते नर विश्वा
नरायाहुः विश्वाहाशर्म्मयच्छत्वमित्र विश्वामित्रऋषिः पृथग्योगकरणमवग्रहप्रत
स्यर्थम् अर्थव्याख्यानार्थेन्ववयवदर्शनम् निष्ठाघुरानं निष्टेत्येतत्पदंदीर्घमापद्यते
आयुरानंचेत् निष्ठारयमभिदं आयुरानमितिकिं आतिष्ठवृत्रहनथं ॥ वर ॥ छंग
या ॥ सह ॥ इइत्येतत्पदंवाणश्च्यायामइत्येतेषुप्रत्ययेषुदीर्घमापद्यते वाण यथा पाव
ताभिः मनोषमः वृक पाश्नुगामादेवाः याम प्रायायायस्वाहा निवारयंहारयोरन्
वशे निरुत्ययमुपसर्गोवारहारयोः प्रत्ययोर्दीर्घमापद्यते वार यथा नीवारान्न
मे हारयथा नीहारेण अवयववयोर्व्युत्पन्नार्थम् वचनं अनवग्रहेणांदिमधेच्छा
नि नाव नयामि अवेत्येतत्पदन्नदीर्घमापद्यतेनयामीत्येतस्मिन्प्रत्यये अवनयामि
अवनयामिवेत्ताकान् धारयास्मेत्येतस्मिन्प्रत्ययेअवशब्दस्यनकारेदीर्घत्वंवत्यति तस्या

Indira Gandhi National
Centre for the Arts

यंपुरस्तादपवाद॥धारयामयोना॥व॥सवस्वतुद॥मोषु॥जयतो॥कष्य॥रत्नयजयक्॥म
पा सथ॥विष्टवंगायाता॥व॥येननकारो॥धारयाम॥योन॥अव॥सचस्व॥तुदमोषु॥जयत॥उ
शा कष्य॥रत्ना॥यज्ञ॥यक्कमन्मथा॥पिपृत॥गायत॥आत्र॥येन॥एतेह्रस्वादीर्घमापद्यंते॥न
५२ कारेप्रत्यये॥धारयाम॥अस्मिन्पत्रेधारयामानमोभिः॥योन॥योनान्विंद्रतेहरी॥अव॥
अर्वनोदेव्याधिया॥सचस्व॥सचस्वानः॥स्वस्तये॥तुद॥अमेजाता॥प्रणुदान॥मोषु॥मोषू
णइंद्रात्रपृत्सुदेवैः॥मोइतिकिं॥ऊर्ध्वऊषुणऊतये॥जयत॥प्रेताजयतानरः॥उरुष्य
उरुष्याणोआधायतः॥समस्मात॥रक्ष॥रक्षाणोब्रह्मणस्पते॥यज॥यजानोमित्रावरुणा
यक्ष॥यक्षानःशर्मसप्रथाः॥मत्स्व॥अर्प्पयथायुवानोमत्स्वथानःपिपृतनिर॥२॥हसः
पिपृतानिरवद्यात्॥गायत॥उपास्मैगायतानः॥आव॥आवनइंद्रवृत्रहन॥येन॥येनानः ५२
पूर्वेपितरः॥भवच॥भवेत्पयंचह्रस्वोदीर्घमापद्यते॥मकारेप्रत्यये॥भावनःसप्रथस्तमः

नवाह्वये पृथग्योगकरणमुत्तरार्थम्॥सत्वावद्रथ्य वाजस्य पाउषुनवा वारुथ्य वाजस्य वा
यु एतेषुप्रत्ययेषुभवेत्पितत्पदंदीर्घमापद्यते सचा इंद्रप्राश्वभवामवा वद्रथ्य उतत्राताशिवो
भवावद्रथ्यः वाजस्य भवावाजस्यसंगाथे पायु भवायायुर्निशोअस्याअदब्धः अष्टकाग्रहणे
नेह उकारोगृह्यते नाकारोदीर्घविधानात् अष्टकाउकारोदीर्घमापद्यते उपदेपरतः उ
न नः उर्द्धेऊषुणः ऊत गोमदूषु [illegible] रथीनकार [illegible] रथीत्पितत्पदंतकारन
कारयोः अत्यय योदीर्घमापद्यते नथि नाम्न रथीनस॥२॥रथीनां [illegible] कोवपन
य [illegible] अप्पकदारिश्शोव पनय
सादयस्तन्न [illegible] सलत्स य अघ श्रराति कत भवत एतेह्रस्वायकोरप्रत्ययेदी
र्घमा [illegible] अघ अवाधमेनिमनपल ॰ अघ उदारिय यस्माद्योनेकदारिथायजे
नम् शोच हहकोवायविश्व पनय देवत्रायनयायुजन सादयायस॥२॥न्तकृतस्यो

श्री नो॥ऋज्रा देवानांभद्रा: सुमतिऋजूयताम॥ द्रुष॥ द्रुषायमाणोद्रुषभस्तराषाट्॥ शत्रु॥ शत्रूय
श्री तो हता॥सलक्ष्मा यद्विषुरूपंभवति॥ घ॥ आघायेअग्निमिंधतेस्तृणन्ति॥ अय॥ अघायत:समस्मा
५२ त्॥ अराति विलो: क्रमोस्पराती यतोहंता॥ ऋतामधुवाता ऋतायते॥ भवत॥ अर्वाञ्चोअघा
भवतायजत्रा॥ वद्यध्वत्रो॥ विइत्ययंह्रस्वोवृधध्वत्रा: प्रत्यययोर्दीर्घमापद्यते॥ वध॥ असमद्य्रवा
वृधो॥ वृज॥ प्रवावृजेसुप्रया॥ अघत २ हकारचकारभवतद्रूणीमहदेवेषु॥ अघइत्यइयं
ह्रस्व॥ तंहकारौ चकार॥ भवत॥ वृणीमह॥ देवाइत्येतेषुप्रत्ययेषुदीर्घमापद्यते॥ नम॥ अघात
मस्यमहिमानमस्कारे॥ अघाकृवेमचकारे॥ आघावसृङम॥ भवत॥ अर्वाञ्चोअघाभवताय
जत्रा: वृणीमह॥ नदेवानामेवोअघावृणीमहो देव॥ अघादेवाउदितासूर्यस्य॥ नहोतरि हो
तृशब्दप्रत्ययेअघइत्ययंह्रस्वोनदीर्घमापद्यते॥ अधत्तनस्तत्रप्राप्तस्यप्रतिषेध: नम घ ५२
होतरिषित: अनीमघहोतारमवृणीतायम॥ शृणुतन्त्विषि धृजिभवति॥ पिवे॥ त॥ स्म ति

ष्ठ रक्षा मकारे शृणुत न्विषि धृजि भवत पिब इत स्मतिदष्ट रक्ष एतेह्रस्वामका
रेप्रत्ययेदीर्घमापद्यंते शृणुत शृणुतामर २ हवम त्विषि शाध्यंमरायन्विषीमते
धृजितवविनंवानइन्धृजीमान भवत आदित्यासोभवतामृळयम: पिब पिबामित्र
स्यधामभि: इत इतामहमकंतोयश्विना स देवासोहिष्मामनतिष्ठ शत्रूयतामाभि
तिष्ठामहांसितिष्ठा मुदानस्यदीर्घोभावतत्र: अनुदात्तार्योमाटभ: रक्ष: रक्षामाकि
र्नोअघ २ सईडान विश्वदेव्यसौमोवत्याम दिश्वेदेवासोमोएताह्रस्वोवति प्रत्यये दी
र्घमापद्य ते विश्वेदेव्य यथा अदितिस्त्वादेवीविश्वदेव्यावती सोम अश्वावती २ सो
मावती वत्रामितिकिं पितृणा २ सोमवताम उदमहोभिर्महोभिर्वारिवारीवान एकार
कारनकारेभ्य: उपइत्ययंह्रस्वोदीर्घमापद्यते महोभि: नसो ईम इकारात्प्रकार नका
र नकारेभ्य: परश्चेद्भवति महोभि: यथाप्रयमानामहोभि: उपामानासाद्रुहती

Indira Gandhi National Centre for the Arts

ॐ नक्तं॥ नक्तोषासासमनसा॥ इ॥ प्रतिधेनुमिवायतीरुषासं॥ ईकाराद्भवति देवी उषासानक्ता
प एकारान्त॥ आस्तपयन्तीयजतेउपासके॥ उषासानक्ता॥ अकारत॥ नेअस्पपोषणोदिव्यनयोवा
प्रा उषासानक्ता॥ नकारात॥ अश्वावतीर्गोमतीर्नउषास॥ एभ्य॥ परइतिकिं॥ समिद्धइंद्रउष
५४ साम्॥ पूरु॥ घोवमानो॥ पूरुषइतिदीर्घोनिपात्यते॥ अवसानेचेद्भवति॥ नसरिष्यातिपूरु
ष॥ अवसानइतिकिम॥ पूरुषएवेदं॥ सर्वम॥ पूस्तोजहीमस्तेषव॥ अत्रैत्ययंह्रस्वोदीर्घ
मापद्यते॥ पूस्त॥ जहीम॥ ते॥ इत्येतेषुप्रत्ययेषु पूस्तः अत्रापूस्त॥ प्रथमोभागएति जहीमः
अत्राजहीमोशिवायो॥ ते॥ अत्रातेरूपमुत्तम मय स्यम॥ नरः सप्तऋषीन्त्तआङ्कन्निः युङ्क्ति
षुयत्र॥ नष्टसप्तऋषी— — — आङ्ग॥ निःयुङ्क्तिरेतेषुप्रत्ययेषुपत्रेत्ययंह्रस्वोदीर्घमाप
द्यते॥ नरः यथा॥ यत्रानरः सचनिवद्भवभि॥ सप्तऋषीन॥ यत्रासप्तऋषीन्पर॥ न॥ यत्रान ५४
श्वकाजरसं तनूनां॥ तआङ्ग॥ यत्रातआङ्ग॥ परमंजनितंनयुङ्क्ति॥ यत्रानियुङ्क्तिः स्वसे

शिनाभिः अभिमाति पृतना स सपत्न धूर्विश्व समत्स पृतना वातेभ्य सहे: अभिमाति
पृतनास्वसपत्नाधू॥ विश्व समत्स पृतना एतेभ्य उत्तरस्य सहे ह्रस्वोदीर्घमापद्यते अभि
माति संहृदाद्यान्यभिमातिषाद. पृतनान्तजेतारमग्निंपृतनासु सासहिं सपत्न सि
ं इत्रिसपत्नसाही धूः अत्रावितधूर्षाहोविश्व विश्वासाहमवसेनूतनाय अमस्त ये
ताससस्वनासहः पृतना पृतनाषाद्यायवज्रात सतोवीराडरवोऽवानसाह्य
गतेः उकवग्राह्यात्परस्याभसेह्रस्वोदीर्घमापद्यतेअसत्यपच्छुभासश्चर्गन्ति
ताप एव अक वक्तन अथ एतेदृश्याच्यंजनमात्रेदीर्घमापद्यते एव एवानोहवं
त अक तिरिशकावसनसि वक्तन यदेनमृष्टमावयं अथा दस्युन्त्सपाण्ये
धमःवि — सोमानासत विश्वेत्ययंह्रस्वोदीर्घमापद्यते सोमसणींसत्रान् युना वि
श यया विश्वानेअर्भेत्रेधात्रयाणि अमोत्रामस्यामितिकिम् आश्वविश्वयां एवनश्र
विश्व अधीःवक्तानासद्वय अथइत्ययंह्रस्वोदीर्घमापद्यते व्यंजनमात्रे यत्र मभाः वा

Indira Gandhi National
Centre for the Arts

ह्वरित्येतेष्वप्रत्ययेषु न दीर्घमापद्यते ॥ अथ ॥ अथायथानः पितरः अयस्मन्नावायुवितिकिं ॥ यस्

प्र अश्वत्रभूयादध्ययघमस्माः स्म ॥ अधस्मतेव्रजनेष्ठत्समस्ति ॥ ग्नाः ॥ उभानामत्याकडोऽअधम्नाः वा

द्वा यु ॥ अथवायुन्नियुतः सश्चतस्याः पूर्वोद्वंद्वेष्ववायो ॥ द्वंद्वेषु समासेषु वायुप्रत्ययरहितेषु पूर्वः

५५ पदान्तो दीर्घमापद्यते ॥ अग्नीषोमौ ॥ मित्रावरुणौ ॥ इंद्राबृहस्पती ॥ द्वंद्वेष्विति किं ॥ अवीरहणौत्व

ष्टवोदनौ ॥ अवायाविति ॥ किंम्य इंद्रवायुसंला ॥ हरीशयेत्येके हरिइत्यतस्य एके आचार्या

दीर्घमिच्छंति शयप्रत्यये ॥ हरिशया ॥ यातेअग्नेहरीशया ॥ एक इति किं ॥ यातेअग्नेहरिशया

पिबासोमं ॥ पिबास्वतस्पस्थाम योअवोदरणेष्वामीष्टमामहानो मां हन्नामशीतमरीरिषोरी

रिषन्नियामयन्निद्विष्मानेव ईवारयि २ सुधीदवंचरानामस्त्रयवसिनी ॥ आतायावर्णोधषो

मानुषः यथाद्विवोयुत्वाद्विगामयानमः सिंन्वनात्वतंपरीवापउक्ताशस्त्राणपन्नाहवी २ ष्या ५५

व्याजानुन्नामारेरिहन्नमाभिदंतोकहेमास्वक्तयेजनयथावंधार ॥ मयितराष्ट्रधोवोधामेविघृता

विधमवताद्वेषुश्रणधीगिरारत्नानोकचर्षणीसहांचर्षणीधृतोयोना ॥ समस्त्वनेमातत्रा

धाभानेषिहारुविनस्तनारथं दीयारघेने नामयववईयात्वंप्रश्चवामाचूनस्मान्नगंथापर

स्यादीरिभाद्विकामं पुरीतंताड्गीहांकार्मः ऋष्णवाकालौप्रकृतिदीर्घाविन्येकेनोकाशां अष्टकाशेन

वकाज्जरतिनिषुकमात्तासलायः मामहानंप्रमार्गोभयाहंतनक्ताविद्धमभीषुमषुष्टीमा

ऊधागण्यमनिद्यान्येनायवाच्छायनोयदीलनमाखारयान्द्विनिषधारपिद्यसहतना

रीमादूनमरानिनिर्यौच्छिविशामनिक्तावधाहंदेहस्ताद्वः सुनमानाछनारयाणःसान्त्वयमि

तिनः एतेष्वादीर्घमापद्यते पिब सोम पिबासोमनमनुष्वधस्मदाय पिब सुतस्य पिबास्तु

तिनः एतेष्वादीर्घमापद्यते पिब सोम पिबासोमनमनुष्वधस्मदाय पिब सुतस्य पिबास्तु

नस्पाधसोममदाय स्य मयोभुवः अपोहिष्ठामयोभुवः नु रणा त्स्वंतयामन्नेतशस्यन्नरण

शभिष्वमइंद्रदेवेभ्यो हविः श्रीव मनहानः समिद्धेअग्नावधिमामहान मनहुंतानेन्नो

मित्रावरुणामामहंतां त्वष्टितस्य अग्नेदम्नयोऽनिमा रिरिषः मानोगोषु मानोगोषु मानो

अश्वेषु रीरिषः मानोगोषु मानोगोषु मानो अश्वेषु रीरिषः रिरिषन मानं मध्यावीरिरनायुः

यमयन्नि प्रियाद्वेषायामयन्नि हि स्म ते यस्ति द्विष्मातेः अस्मिन्नवयाः दीतिकिम् ॥

Indira Gandhi National
Centre for the Arts

प
श्रा
५६

अधस्मेतेभ्रजनं॥वर्द्धय॥रयिअयानोवर्द्धनोवर्द्धयारयिं॥श्रुधि॥हवं॥इमम्मेवरुणश्रुधीहवम्॥व
॥सोम॥अवीरहाप्रचरासोम॥स॥यवसिनी॥स्वयवसिनीमनवेदशंसा॥ओत॥ग्रावाण॥ओता
ग्रावाणोवि॥गेनयज्ञम्॥धर्ष॥मानुष॥धर्षामानुषः॥पाथ्य॥दिवः॥पाथ्यादिवोविमहस॥जुस्व
हिकेशिवाहरी॥युक्ष्वाहिदेवहूतमान्॥गमय॥तम॥अधरंगमयातमः॥सिंचत॥स्रुतं॥परीतोषिं
चतास्रुतं॥परि॥माप॥पयोदधि॥तन्फ॥ग्रामत्राणि॥छंदोभिकन्याग्रामत्राणि॥अन्न॥हवीं॥षि॥अन्न
हवींषिप्रयतानिबर्हिषि॥अव्या॥जानु॥अव्याजानुदक्षिणतोनिषद्य॥त्वाम॥रेरिहत॥त्वमारेरि॥
हदीकधः॥समंजन॥त्वमाभिंदन्न॥त्वीमाभिदन्तोअरुणीरपवत्र॥रुहेम॥स्वस्तये॥अस्त्रं॥वंतामा
रुहेमास्वस्तये॥जनयथाव॥आपोजनयथाचनः॥धारय॥मयिधारय॥मयिधारयामयिप्र
जा॥तर॥स्त्रध्यध॥अस्मेत्वतरामृधः॥वोधामे॥वोधामे॥वृत॥वंधम्॥अयस्मयंविवृतावंधमेत
म॥अवताह॥वेषु॥अवताहवेषु॥श्रृणधिगिर॥श्रुः॥पाहिश्रृणधीगिर॥रक्षतोकम्॥रक्षातोक ५६
सुतत्मना॥वर्षणिसहा॥वर्षणीसहांनेत॥वर्षणि॥धृत॥ञोमासश्चर्षणीधृतः॥येमत्व॥येम

त्व येमासमत्वमासहः वनेमाते वनेमातेत्र्यभिः ऋध्यामतर्ण्हे शिव सखिभः शि
वासखिभ्योहविषिस्वधावःतत्तरयम ततारयमुपग्मम २ तदेम तीय रयेन वृहस्पतेपरि
दीयारयेन यत जयतेवतात्यतानरः तर्द्धय यं त्वमग्रवर्द्धयात्वम प ब्रुवान वया
म्नामप्रवामाहूतस्यतस्य श्रातयन्तु परस्याः श्राव्जवन्यापरस्याःरतिम हिकामम रति
माहिकामम ररिमाहिकाममु पुरि तता अन्नगितंपुरीतता अस्यपदस्याङ्गवादोसिश्रुतः
तथाहि कामं पशुपतेः श्रुतीतथितितदपि भवति श्रीहाकागांशुणाकाणीएतोश्राहोत्रका
तिदीवानितिपेव्याआवायमन्यते श्रीहाकागांशुणाकाणीः नियाश्वाः धृम्यावधुवीकागाः
अत्र काशिन श्रेतामहूकाभेत वक्षी जवतम्न यन्दनश्रुक्रासमंततन्तूतात नियुक्तः
छिन्नागाद्वाएपसितामिधूमकः ततः साखाः धतिष्टतटव्यरतामालायः मसकानसा
त दंडश्चाभिग्रुनावाश्चप मार्गा मापामार्गत्वमस्मात दनः येकेवाभयारतः ऋति स

Indira Gandhi National
Centre for the Arts

प्र
शा
५०

हुम्। तंवो दस्मम्वृतीषहम्। अद्दम्। अभि। त्व। अभीषुणा। सावीनाम्। स्तृष्टरीम। स्तुषाणा
स्तीर्णबर्हिः। स्तुष्टरीमा। स्तुषाणा। यज देवान्। यजा देवां ॥ ऋतं बृहत्। येन। पावक। येना
पावकचक्षसा। अश्वा। यन्न। अश्वायन्तो मघवन्निन्द्र वाजिनः। यदि। सरमा। विरुघ्नीसर
मा। स्वदय। सुजिह्व। स्वदया सुजिह्व। निषद्य। दधिष। अस्मिन्यज्ञे बर्हिष्या निषद्या दधिषु ॥ १ ॥
सदतन। रणिष्टन। निबर्हिषि सदतना रणिष्टन। भर। विकित्वान्। उन्नानायामव भरा चिकि
त्वान्। विकित। गविष्टौ। उभयेभ्यः प्रविकित्सा गविष्टौ। अव। ददन्त। भगोमांधियसुदवाददन्नः
रक्षः। चरक्षा। वनो अधिवक्षू हिदेव। अयुनक्। यमेन दत्तं त्रित एनमायुनक्। सृजा। रराणः। व
नस्पतेवसृजा रराणः ॥ सदन्यम्। सादन्यं विदथ्य ॥ स चेयं। अनुनासिकमुपधा प्रागस्त्या
याः। ह्रस्वो दीर्घः प्लुतः सानुनासिको निरनुनासिक उदात्तः स्वरित इति स्वरधर्मास्तत्र पदे दृष्ट
स्याप्यन्यथाभावो विकार उच्यते। विकारश्च स्वरस्याधिकृतो व्यंजने दीर्घ ॥ मित्यत आरभ्यात इ ५०

हापि स्वरस्यैवानुनासिकं विकार उच्यते व्यंजने इत्यास्तु विशेषो मकारो वेवो पधाभूतौ तयो
श्च विकारे सति स्वरविकारः यत्र तु तयो प्रकृतिभावो वा लोपो वा तत्र स्वरस्यापि विकारो न
भवति यथा ॥ मात्सीत ॥ इत्येवमादि प्रागंतस्यसंप्राहृनाघदित ऊर्द्ध्वमनुक्रमि
ष्यामस्तेनोपधाभूतः स्वरोनुनासिकं स्वरमापद्यते इत्येतदधिकृतं वेदितव्यं वक्ष्यति
नु ॥ प्लुषीन् वक्षथ वाविश्रुषीश्चक्षथ तथा बृहस्पतये गवयान् व
वर्याल्लत्तमत्र स्वरोपरि सि: आपविशिरादार्यः स्वरः एवं प्रत्ययउपधानुनासिका
सिक्तं सुविलिवत्याति अत तस्यैव परभूतयः स्वर उकत उपधावतवग्रास्था यथा मघो
महान् इन्द्र. महां १ इन्द्रोवज्रहस्तः स्वन् अदम् सो ॥ अद्रम् शत्रून् अप जहि
शत्रूंरप मृधोनुदस्व स्वरइति कि गवयांस्तत्र उत्सारेणा व्यंजने नकारापुपधा
नुनासिकत्वं भवति नउकत्वादिकारस्य नपुंसकाइतोयोनकारस्तस्य संधिनइ

Indira Gandhi National
Centre for the Arts

आ
श
५८

रस्यलोपोभवति॥यथा॥एमन्‌॥सादयामि॥भस्मन्‌॥सादयामि॥एमनिभस्मनिइतिप्राप्तेइका
रलोपश्चांहस॥नपुंसकाडन्तस्येकारलोपडक्तः॥अनपुंसकादपिभवति॥अश्मन्‌॥ऊर्ज्ज
मू॥अश्मनीतिप्राप्ते॥नसप्तम्यामंत्रितयोः॥सप्तम्यामंत्रितयोर्विभक्तिसंधिनइकारस्यलो
पोनभवति॥यथा॥अपां॥वासधिषि॥अपांत्वापाथसि॥सप्तम्यामुदाहरणम्‌॥देय॥थं॥सि
आमंत्रितविभक्तेरुदाहरणम्‌॥पूर्वसूत्रेणनकारांतादिकोरस्यलोवसिद्धि॥अनकारान्तार्थं
आरम्भः॥॥ १॥ नॄन्पकारेविसर्ज्जनीयंनॄन्इत्ययन्नकारःपकारेप्रत्ययेविसर्ज्जनीयमापद्य
ते अनुनासिकाचोपधा॥नॄन्‌॥पाहि॥नॄः॥पाहिस्मएधागिरः॥शत्रून्परिधीन्कतॄन्वनस्प
तीस्वरेरेफम्‌॥शत्रून्‌॥परिधीन्‌॥कर्तॄन्‌॥वनस्पतीन्‌॥एतेनरान्काराःस्वरेप्रत्ययेरेफमाप
द्यते॥अनुनासिकाचोपधा॥शत्रून्‌॥अप॥जहिशत्रूंरपमृधः॥परिधीन्‌॥अप॥परिधीर ५८
पोर्स्य॥कर्तॄन्‌॥अनु॥अग्नेकर्त्ताकर्तॄरनु॥वनस्पतीन्‌॥अनुयेवावनस्पतीरनु॥आकारो

पयोर्यकारं आकारोपधोनकारोयकारमापद्यते स्वरइत्यनुवर्त्तते अनुनासिकोपधीव म
हान्इंद्रः महाँ॥२॥॥यइंद्रः इत्येवसंहितायांप्राप्नोति नतोयवयोःपदांतयोःसरेखं
ज्ञेनेनुस्वाणमिक्षव्यवधानमिक्षत्वागमिकेनश्रोष्टविशिरावार्यः अयंवउपधानकारयो
रन्तभवति यत्रनकारस्यमकारः आकारोवाविहितआयंभवति अनुस्वारःरोष्मारित
तिवचनात सुधीश्च्च्वस गवयांस्त्वमि नःनकारोविकृतोवेदितव्यः चकयोःशम्‌ चका
रककारयोपरयोर्नकारःआकारमापद्यते अनुनासिकाचोपधाअहीन्॥च॥अहींश्च
सुसर्वान्‌ सुधीन्‌ चत्वष सुःधीश्चत्वष छकारोदाहरणंश्रृणष्ठ इत्योदाहरणंदीयंत
वेद्वान्‌ छकारः विद्वांश्छकः नथयोःसम्‌ नकारथकारयोर्नकारःसकारमापद्यते अ
नुनासिकाचोपधागवयान्‌ त्वमि गवयांस्त्वमि अन्यान्॥त अन्यांस्तअस्मत अस्मान्त्व
म अस्मांस्त्वअस्मि थकारस्योदाहरणम्‌ विद्वान्‌ थकारः विद्वांस्थकारःइत्यादि

Indira Gandhi National
Centre for the Arts

वान्पकारेलोपम्॥ दधन्वान्‌स्ववान्‌एतौनकारौपकारेप्रत्ययेलोपमापद्येते॥ अत्रलोपविधानाड
प्रा पधानुनासिक्यमपिनभवति॥ तथाचोक्तं॥ स्वराणामनुनासिक्यप्रतिजपत्निसर्वेदावर्ज्जेयि
शा त्वातमाकारेयत्रलोपोवि — — — दधन्वान्॥ यथा॥ दधन्वायोनर्यःस्ववान्॥ यातःसहूतीकः
५९ स्ववायान्वर्घोङ रयिष्टधेच॥ रयिष्टधइत्येतस्मिंश्चप्रत्ययेपूर्वोनकारोलोपमापद्यते॥ पीवोअन्ना
न्‌रयिष्टधः पीवो अन्नारयिष्टध॥ उक्तहेतुत्वादाग्रास्वरमध्येवोपइतिपकारलोपेकृतेनपरका
लः पूर्वङ्कालेपुनरितिसंधिर्न्नभवति॥ ततोमहां॥ २॥४॥ इंद्इत्येतद्रूपंसिद्ध्यति॥ ननुयथा॥ द
धन्वान्स्ववान्पकारेलोपमितिनकारलोपेकृतेसतिउपधानुनासिक्यन्नप्राप्नोति॥ एवमिहा
पिनकारस्ययकारीभूतत्वाद्अवर्णाउपधानासिक्यन्नप्रवर्त्तते॥ कथमुपधानासिक्यमिति
लुप्तस्यापिस्वकार्यकारणादित्यदोषः॥ यदिद्वियकारोव्यंजनकार्यन्नकुर्यात॥ कथमिह
स्वरयोःसंधिर्न्नस्यात्॥ अतःकार्यकरणाउपधानुनासिक्यमपिभवति॥ यथा॥ वष्टिमानि ५९

वेतिष्टष्टिमां॥ ३॥ः इव ननमे यन्नकारस्यनकारेप्रत्यये वंद्विनेनत्रमप्रत्ययेनभवति मदि
न नमाना यद्विन्नमानोंत्रापन्मन् मधुन् तमानो मधुन्नमानाल्लाथत्मन् तययोःसमिः
स्यायमपवादः निर्ज्जगत्वाभमसि निर्ज्जगन्वानित्ययंनकारस्त्तमसिप्रत्ययेनविकामापद्य
तेनिर्जगन्वान् तमसः निर्जगत्वान्तमसोज्योतिषागात॥ धामन्छत्रे श्चिकित्वांत्वंपूर्वन्नर्वन्नि
तिच धामन् शत्रून् विकित्वान्त्वम्पूर्वन् अर्वन् एतेनकारानविकारमापद्यन्ते यथा धा
मन्नते धामन्नेविभ्रूत शत्रून्ताढि लि शत्रून्साटिविष्टधानुदस्व चिकित्वान् ांश्चावयदमि
द्ध्यश्चिकित्वांन्ने चिकित्वान्स्मितिकिम् नश्चयमोहूदस्यानश्चिकित्वान्नात्सि पूर्वन् नवपूर्व
वश्रेतवयन् अर्वन् नवग्रागोंपतयिर्व्नर्घोन्नव इतिवन्दस्यावयवस्यार्थः इतिशाक्षःप्रद
र्शनार्थः यथाधक्तनस्त्रयोः नकारेनकारस्यप्रकृतिभावएवमिदापितकारएवतथावष्या
त्वातं वकारस्तकारापवादावधिद्योतनार्थः अश्चारोवाध्याये स्वरइतिवर्त्तते अपृक्तन्पृ

Indira Gandhi National
Centre for the Arts

रइत्यस्मिन्नध्यायेनकारआकारोपधः स्वरेप्रत्ययेप्रकृत्याभवति॥ आकारोपधोयकारमित्यस्याप
प्रा वादः॥ यथा॥ समुद्रायशिशुमारान्॥ आलभते समुद्रा शशिशुमारान् लभते॥ मण्डूकान्
शा अद्भ्यः॥ मंडूकाकान्अद्भ्योमत्स्यान्॥ स्वरान्तइतिकिं॥ गवयान् चक्रे॥ गवयाँस्तसो सुषीत॥ च
६० त्तपे॥ सुषीस्त्वत्तपे॥ मनुष्यांस्तांल्लोकानमित्रानुदित॥ मनुष्यान्॥ तान् लोकान् अमित्रान्॥
एतेनकारः प्रकृत्याभवंतिउदित्युपसर्गो॥ यथामनुष्यान् उत मनुष्यानुदजयतां॥ तान् उत
तानुज्जेषम् लोकान् उत लोकानुदजयत अमित्रान् उत अहमणःमित्रानुत्तयामि॥ आ
प्नोतित्योश्च॥ आप्नोतौप्रत्ययेइतौचप्रत्ययेनकारोनविकारमाप्यते॥ यथा॥ भक्तान्॥ आप्नोति॥
इत्याभिर्भक्तानाप्नोति इतियथा॥ गयवान् इति अदितिः॥ अपयानिति संक्रमेववैस्तवावान्॥
वैस्तवानित्ययन्नकारोनविकारमापद्यते स्वरेप्रत्ययसंक्रमेव संक्रमश्चक्रमेभवति॥ अतःक्र
मसंहितायामित्यर्थः॥ वैस्तवान् अव वैस्तवानव॥ गृहानेमि गृहानुपह्वयमहेववर्स्वानृह ६०

म्नुष्याननरिदनग्निधान्नाग्रहमनः पपस्ता नग्नेनाश्विनापतगान्संदित स्वर्गानपायति
सपत्नानिनिन्द्रः सपत्नानिन्द्राग्नीनमस्तानइंद्राचविंढीनमेईयानस्तोधतामननज्ञानाश्च
रथेतानष्टौविद्रयानालभते एतावानस्याद्भ्यानग्नेदायध्यानारणः अविद्वान् श्विनान
ह्वानयोनेमोग्रहलनुयेयाश्रुयाननेस्यादस्मानरिष्टेभिः गृहानेनिगृहानुपह्वयाम
हे यद्वस्मानदं मनुष्याननरिदं अग्निग्राह्नाग्रहमतः पदःस्वानग्ने तान्श्विना॥
पतंगानसंदितः स्वर्गानपायतिः मयन्नानिन्द्र सपत्नानिन्द्राग्नीम नभस्तानाद्ंत
नुः विद्वानग्नेः देयानस्वधता अनज्ञानाश्चः अथैतानष्टौविरूपानालभते एतावात
आयुष्मानग्ने वायव्यानारणः अविद्वानश्विना अनज्ञानधीरासो शत्रूनजयं यानुधा
नानस्मात् अस्मानरिष्टेभिः एतेषांद्विपदानांपूर्वपदानायानकारः प्रकृत्याभवति॥
यथा गृहान् आ एमि गृहानेमिमनसा गृहान् उप गृहानुपह्वयामहेतेनः व

Indira Gandhi National
Centre for the Arts

प्रा
शा
जिहीर्षेत॥यज्ञ: अत्रनकारसदृशोयमसंभवतिसवर्ज्य:॥ ॥स्फोटनकाकारवर्गोवास्प
र्श: स्फोटनेनस्पर्शोदोषमापद्यते ककारवर्गोपरश्चेत नंतथादोषएवस्वरात्संयोगादिद्वि
रुक्तेर्विधानात नच नचस्फोटनेसतिद्विरुक्ति:संभवति तयावोक्तामयमान्विद्याद्यस्पिंड
स्यातथादारुपिंडवत॥ अत्रस्यायमवर्ज्जन्तुअर्णपिंडंविनिर्दिशेत॥ अयस्पिंडादीनांयमसंश्लेष:

Indira Gandhi National
Centre for the Arts

प्रा॰ शा॰ ९०

नथैवेषांव्यंजनानिमित्तिनिक्षोकार्यः॥ स्वरात्स्वरेपरेसमानपदे — यत्रऋकारो॥ वाशाद्देविकल्पार्थे
इहानुवर्त्तते॥ स्वरात्परोवाजकारोयकारोवकारमापद्यते॥ स्वरेपरश्चेतेसमानपदे॥ नतुऋकारो॥ य
था॥ अजोस्त्वग्रेरजनिष्ट॥ अयोग्रेः॥ अजोस्येकपात्॥ अयोस्येकपात्॥ स्वरादितिकिं॥ अज्ञागोज्ञाः
स्वरइतिकिं॥ शुन्पः॥ आन्पम्॥ यमानपदइतिकिं॥ नमिंद्रेणजयत॥ नऋकारइतिकिं॥ विजृंभ
माणाय व्यातेः॥ व्वयोःकशोगार्ग्यः स्वरयोव्यमुव्यवर्जम्॥ व्याप्रकथनइत्यस्यधातोः वकारय
कारोसंयोगमाह्॥ केचित्॥ तिव्यायवस्त्रपात्वं॥ आव्यातं॥ अस्यककारशकारौगार्ग्यआह॥ वि
वशायचस्तुष॥ अवश्यातं॥ एतानिपदानिवर्ज्जयित्वा॥ सर्वं॥ गव्यं॥ सुव्यं॥ अधस्तनयोगेजकारस्य
कारापतिरुक्ता॥ यावास्मिन्योगेव्यातेःकशापतिरुक्ता॥ एतेचरकाणाम्॥ इतरेषन्तलक्षण
विधिः॥ सयेदमाहत्रिपदायावर्त्तमानेसंक्रमः॥ संहितायामित्यतआरभ्यसंहितायांलक्षणं
विधायाधुनापदसंहितालक्षणविधिरिक्तस्ययेदमाहत्रिपदप्रभृत्यावर्त्तमानेग्रंथेसंक्रमो ९०

भवति आवर्त्तमानानिपदान्यतिक्रम्यानावर्त्तमानेनपदेनग्रहस्तदसंबंधिर्भवतित्यर्थः यथ
वयंस्याम पतयः रयीणाम् स्वाहातस्मैताइंद्रा हतिषा विधेर्हिमतद्विषदः पितरः इ
न्द्र आयाहि चित्रभानोति स्तताः इमेभ्यव अर्णोभि तनाःपूतासः धियाइषितः अय
त्नावन्तत्कर्गः द्विपदैकपदानामनुवाकेद्विपदेसमाहतेद्विपदश्च एकंचतत्पदंचैकपदम्
द्विपदानिचैकपदानिचबह्वृचनोपदेशात् त्रिरावर्त्तमानानिसंक्रम्यते अतिक्रम्यतइत्यर्थः
विशष्टत्तइतिद्विचत्वारि यथा वाजः वसे प्रसवः भ्य तिः म छंदः प्रमा प्रतिमा॥
अनुवाकइतिकिं वसोःपवित्रं असि द्यौः पृथिवीवीकाकुटः असि त्रि शष्टत्तइतिकिं व्रतं
कृणुपुतसोमः पवते सोमःप्रवते इषे त्व ऊर्जेत्वा अग्नाे उभयोर्गपयोगयोरयंयो
गेःशेषः त्रिपद आवर्त्तइतियुक्तंतदनंतरंपुनरुक्तेभवति आनन्तर्यञ्चाअर्थइहशाहृष्टतं
चयद्यते॥ यत्रानन्तरोर्थोव्यवहितोर्वावृद्धोविपरिवर्त्तते॥ तदर्थप्राप्तमानन्तर्यं यथा गधर्वः

Indira Gandhi National
Centre for the Arts

प्रा
त
९१

त्वा॥ वि॥ श्वा॥ वसुः॥ परि॥ दधातु॥ विश्वस्य॥ अरिष्ट्यै॥ यजमानस्यपरिधिः॥ असि॥ अग्निः॥ इडः॥ ई
डितः॥ इंद्रस्य॥ बाहुः॥ असि॥ दक्षिणः॥ मित्रावरुणौ॥ त्वा॥ उत्तरतः॥ परिधत्तां॥ ध्रुवेण॥ धर्मणा॥ विश्वस्य॥ अरिष्ट्यै॥ यजमानस्य॥ ... मन्त्रादाहरणमेतत् यवदि
तेत॥ मधुः॥ च॥ माधवः॥ च॥ वासंतिको॥ कतू॥ शुक्रः॥ शुचिः॥ ग्रैष्मे॥ एवंस्वयमातृणवर्जयास्व
अर्थकृतमानन्तर्य्यमुच्यते॥ कः॥ त्वा॥ युनक्ति॥ सः॥ कस्मै॥ तस्मै॥ त्वं॥ अग्ने॥ द्युभिः॥ आशुशुक्षणिः
अद्भ्यः॥ अर्थेनानन्तर्य्यइतिकिं॥ याः॥ ओषधीः॥ पूर्वाः॥ जाताः॥ अत्रयाइत्येतदोषधीविषयंदम॥ त।
तोयाः फलिनीरीत्येतदपिओषधीविषयत्तदर्थव्यवधानान्नालम्भेयाः फलिनीः अफलाः इत्य
त्रसन्निधानान्नलभ्यते यद्येवं अपुष्पाः याः च पुष्पिणीः इत्यत्रयाइत्येतत्पदंकस्मान्नल
भ्यते उच्यते सूत्रया फलिनीः याः अफलीः याः अपुष्पा च पुष्पिणीः एवंचत्वारोत्रया
शब्दाअत्रदृष्टाभवंति तत्रप्रथमस्यद्वितीयेनसहसंबंधः तृतीयस्यचतुर्थेनसह तत्रतृ ९१
तीययाइत्येतत्पदत्तविद्यते इत्यस्यार्थस्यज्ञापनार्थचतुर्थत्रलभ्यतेयाइत्येतत्पदं सूत्रा

नानर्थम् अश्विभ्यां पिन्वस्व सरस्वत्यै इडायस्वाहा इंद्रवत् पाते विवः सहे मृशः पा
हि मधु गर्भः देवानाम् अपरस्मात्परसंगाभूतेपुनरुक्तेसंधाने भवति स्वाहा यज्ञम
ननसः उतो अन्तरिक्षात् द्यावापृथिवीभ्याम् वातात् आरभे स्वाहा अत्रस्वाहाका
रपरांगं अपरांगस्मात्स्वाहा अपरांगइतिकिंस्मादाह आकूत्यै प्रयुजे अग्नयेस्वाहा ।
अयंस्वाहाकारोपरांगंनभवति केवलत्वात् अस्वरविकारे नविधानस्वरविकारोयस्मि
त्पुनरुक्तेतदस्वरविकारंपुनरुक्तं तस्मिन्पुनरुक्तेसंक्रमोभवति यथा तेजः असि श
ुक्रम् अस्मृतं धाम नाम अस्वरविकारइतिकिम् सत्यम् असि शिव व असि सा
ना देवा यज्ञन् अतन्वत अघजम यत् पुरुषेण हविषा देवाः यज्ञम् अतन्वत अ
लिंगविधाने लिंगविकारेनविंदतियस्मिन्पुनरुक्ते तदतिक्रम्यते यथा अग्नेः भागः
असि दीक्षायः अधिपत्यं ब्रह्म स्पृतं त्रिवृत् स्तोमः इन्द्रस्यविष्णोः तत्र पंचदशः

प्रा
शा
९२

अत्रस्पृतशब्दोनपुंसकविषये॥अनेतिक्रम्यते॥अलिंगविकारइतिकिं॥आदित्यानाम्॥
मरुतंगर्भाः॥स्पृता॥देवस्य॥सवितुः॥बृहस्पतेः॥समीची॥दिशा॥स्पृता॥एकत्रस्पृतश
ब्दःपुरुषविषये॥एकत्रस्त्रीविषयेनोत्पद्यते॥सं॥ते॥पया॥ंसि॥सम॥यन्तुवाजाः॥संवृ
ष्ण्यानि॥अर्थत्रयाणांसब्दानांप्रथमोनपुंसकविषयेद्वितीय॥पुरुषविषयएतोवृद्यते॥तृ
तीयोनपुंसकविषयएवातोलिंगभेदातिक्रम्यते॥असमासे॥असमानविषयेपुनरुक्त
आवर्त्तमानेसंक्रमणोभवति॥यथा॥आयुः॥यज्ञेन॥कल्पतां॥प्राणः॥वक्तुःश्रोत्रम् पृष्ठम्
अत्रआयुरादपोयज्ञक्रचेरसमानः॥असमानइतिकिं॥यज्ञो॥यज्ञेन॥कल्पताम्॥अत्रय
ज्ञोनकल्पताम्॥समानोवृद्यते॥त्रिराद्वृत्तोत्रिराद्वृत्तेपुनरुक्तोक्रमोभवति॥द्विपदैकपद
न्यप्यनुवाकइत्यस्यायंविशेषः॥यथा॥इषे॥ऊर्ज्जे॥रय्यैपोषाय॥आयुःत्रिवृत्त॥त्रिरा ९२
वृत्तइतिकिं॥इषेत्वा॥ऊर्ज्जीत्वावयवः॥गृहेत्रिरावृत्तोपिसंक्रमोभवति॥गृहोनामयत्रद

तीयस्याद्वृत्तिरनुषंगापेक्षितश्चात्पदस्याधस्तनपदसंयोगेनभवति इयंतेराडयन्ता अ
सि यमनः॥ध्रुवः धरुणः अधास्तित्तिशब्दोयन्ताध्रुवइत्येनयोःपदयोःसलग्नःपठ्यते
यमतः धरुणः इत्येनयोः पदयोस्त्वनुषज्यते अनुषगापेक्षितेणोद्विणो॥द्विते सए
वंगृहस्त्वतरः सर्वत्तमानःश्चत्वाद्विरावर्त्तोप्यतिक्रम्यते गृहइतिकिंइषे त्वाऊर्ज्जे त्वा
पंदसमूहेपदसमूहः पदसंघातःयत्रएकादिपदंबद्धत्वाआवर्त्ततेसपदसमूहोत्राभि
प्रेतः त्रिपदाद्यवर्त्तमान्नइत्येनैवेतरस्यगतार्थत्वात् यथाशतरुद्रियाध्यायेद्विरए
वाहवे सेनान्ये वाजःवासे प्रसवः प्रयतिः प्रसितिः ननु त्वरितिस्वः चमे यज्ञेनकल्प
न्तां इत्यग्रकयात्लोपोनभवति सूत्रए अणधिकारार्थपुनरुक्तस्यातिक्रमः तथाचोक्तं इ
इदेवार्थग्रहणमित्युपरिष्टाद्वक्ष्यति तेनसूत्रेणपुनरुक्तंगृह्यते एवमर्थविशेषात्पुनरु
क्तस्यग्रहणंभवति अर्थसामान्यात्पुनरुक्तस्यातिक्रमः तथाचोक्तं इषदेवतार्थलिं

Indira Gandhi National
Centre for the Arts

प्रा त ९३ गवचनेस्वरकर्तृभेदेभ्यः पुनरुक्तस्यग्रहणंभवति आह पुनरुक्तानित्रयंते पदानीत्याह
शाकल्यः अलोपइतिगार्ग्यस्या काएवस्यार्थवशादिह्निति स ऽंहितायांचआर्य्यांवसंहि
तायांपुनरुक्तआवर्तमानेसंक्रमोभवति यथा लोकताइन्द्रम् हिरण्यगर्भइत्येषमामाहिं
सीदित्येषायस्मान्नजातइत्येषः एवंवक्तव्याब्रह्मयज्ञसंहितायांगतितत्त्ववोध्येतव्याः ब्रह्म
यज्ञसंहितापरिपूर्णतायो अवसानार्थंपुनर्ग्रहणं एवमवसानार्थंपुनर्ग्रहणं एवमव
सानार्थनिधनंपुनरुक्तस्यग्रहणंचोक्त्वाथेदानींसंहितार्थमाह संहितावसानार्थंचपुन
रुक्तस्यग्रग्रहणंभवतियथा आकूत्यैप्रयुजे अग्नयेस्वाहा मेधायै मनसे दीक्षायै तप
से सरस्वती पूष्णे अग्नयेस्वाहात्यत्रपुनरुक्तमवसानार्थंगृह्यते बृहस्पतये हविषा वि
धेम स्वाहा नात्रावसानादन्यत्प्रयोजनान्तरमस्ति अधिकारार्थन्च पदाधिकारज्ञापनार्थं ९३
चपुनरुक्तंगृह्यते यथा इषाय ऊर्जाय स्वनिम्नः स्वाहा मूर्द्धे वाग्भुविने अन्नस्यरि

त्यतत्स्परतोयस्वाहाकारस्यग्रहणंतदधिकारार्थं यदिस्वाहाकारोलुप्यतेतदाक्रमसंहितायाम
त्यपदस्यवेष्टकंतस्यादतःक्रमसंहिताधिकारार्थंस्वाहेत्येतस्यपदस्यविकारस्यात यथा स्वः
मूर्द्ध्नोव्यश्नुविनेतथावसतिष्टंघेरत्वादस्यपदस्यक्रमसंहितायांवेष्टकोनस्यदतःपदक्रमसं
हिताकारार्थंस्वाहेत्येतस्यपदस्यग्रहणम् उत्सर्गोश्च उत्सर्गः परित्यागः परित्यागश्च॥
धत्तनस्तत्रविहि तस्यलक्षणस्यभवति केषांचित्राचार्य्याणाम्मतेन यथा स्वमूर्द्धिं मूर्द्धे
व्यश्नुविने एवंवक्तव्याविकल्पेनैवतल्लक्षणं क्रमः स्मृतिप्रयोजनं क्रमइत्ययमधिकारमध्याय
परिसमाप्तेः संहिताध्ययनेप्रसिद्धंप्रयोजनंयज्ञअध्ययनेचसंहितवाधिनियुज्यते तथापू
र्वानामर्थपरिज्ञानद्वारेणसंहितायाःसहसंबंधात्पदाध्ययनस्यसंहितार्थपरिज्ञानप्रयोजना
मिपरिगम्यते उक्तंचभाष्यकारेण पदानिस्वस्वमर्थमभिधायनिवृत्तव्यापाराण्येवेदानींपदार्थ
अवगतास्सन्तोवत्तार्थङ्गमयन्ति इति पदपूर्वकपदार्थपरिज्ञानंपदार्थपरिज्ञानपूर्वकंवाक्या

Indira Gandhi National Centre for the Arts

प्रा शि ९७

र्थपरिज्ञानम् दर्शयति एवसंहितापाठेवसिद्धंप्रयोजनं तथाक्रमपठितत्वाह स्मृतिंप्रयोज
नंसंहिताविषयंहठंस्मरणंकरोतिपदाविषयंवप्रयोजनं दिगियंस्त्वक्रत्वाप्रदर्शितंप्रयोज
नानित्वस्यान्यानित्वस्यान्यानिबहूनि यथा द्वयोर्द्वयोःपदयोर्वर्णःसंहितोदात्तादिस्वरसंहि
ताचक्रमनुक्तानान्येनज्ञायते संहितावसानंचक्रमंचैतत्पारकरणंकर्म्मशास्त्रानंचशिष्टानां
मध्यक्रमंकरोति व्याकरणस्मृतस्वक्रमाध्यापिनिप्रत्ययंविदधाति नहधीतेतद्देद क्रमादिभ्यो
वुन्नित्यत्रक्रममधीतेक्रमधीतेक्रमकःपदकः शिष्टक्रमस्याध्ययनंदर्शयति इतिक्रमोबहुप्र
योजनत्वात्॥ ॥द्वेद्वेपदेसंदधात्युत्तरेणोत्तरमवसानाद्दृष्टत्वावर्ज्जम् द्वेद्वेपदेसंदधाति कथं
संदधाति उत्तरेपदःसंदधाति ततस्तेनान्यदुत्तरंपदमवसानेयावत् अपृक्तंवर्ज्जयित्वा
अपृक्तंवक्ष्यति यथा उपत्वा त्वाग्ने अग्नदविष्मतीतीःहविष्मतीपृताचीः घृताचीर्यन्तु यन्तु
हर्य्यत हर्य्यतेतिहर्य्यत अपृक्तमितिवर्ज्जोमोमाहयदङ्स्मान् हरुस्मानालभतोआलभतोआ ९७

लभतोआलभते कर्म्मणआप्याधायधम आप्यायदं उङ्लां ॐइत्यूंत्वाविश्व नमुत्वा उँइत्यूं त्वाद
धाङ्ः त्वादधात्यूःअपृक्तमध्यानित्रीणिमत्रिक्रतःआकएतकारश्चापृक्तःएकामध्येइतिअत्रतो
मध्यानि तद्गुणसंविज्ञानोबहुव्रीहि लंवर्णवत् त्रीणिपदानिसंदधातिसत्रिसोभवति यथा
सोमा यहङ्स्मान् हरुस्मानालभते अलभते कर्म्मणआप्यायधं उङ्त्वा ॐ इत्यूं त्वाविश्व
नमुत्वा ॐतइत्यूं त्वादधाङ्ःपुनराकारेणोत्तरं आकारउकारश्च पृक्तोतयोरुकारस्यप्रगृह्यत्वा
उपरिष्टाद्द्विष्टकस्य आकारस्ययद्दत्वंतदाह त्रिक्रमंकृत्वापुनराकारेणोत्तरंसंदधाति यथामो
मायदङ्साव हरुस्मानालभतेआलभते कर्मणआप्यायध्व आप्यायधमोषुणाभीषुणोवासोषु
णःअभीषुणः एतेवत्रिक्रमोभवतःयथा मोषुणः मोइतिमो स्ववः नइंद्राअभीषुणः स्वनः न
सर्वोतो चत्वार्यपृक्तपूर्वनकारपरसो चत्वारिपदानिसंदधातिस्वइत्येतस्मिन्पदेअपृक्तपूर्वे
नकारपरेच यथा ऊर्द्धऊषुण ॐइत्यूंस्वनः नक्तयोगोमद्दषुणसत्वा गोमदितिगो मत्

Indira Gandhi National
Centre for the Arts

ॐ स्तुना सत्या नासत्याभ्यावात्मकारपरेवङ्गे स्तइत्येतास्मिन्पदेऽप्रकृतपूर्वेमकारपूर्वेके आचा
र्याश्चत्वारिपदानिसंदधाति यथा महीमूषुमातरम् यद्यन्यश्चायमेकीयः पक्षः एतश्चत्वक्रमेषु
सर्वेषुपूर्वोभावुत्तरःस्वपदात्तोनकारादिपदम् यथाग्नि सद्दृषुणासत्या तत्रउकारोभावीस्त्रपदस्य
पलेनिमित्तंतत्रेयदिचतः क्रमोनस्यान्नलविकृत्यत ततस्त्वार्षासंहितास्मृतानस्मात्रत:क्रमेत
मास्मृताभवति नवावादिश्चदिहस्तुत्वाहंविताम् कारादेःपदेस्तुविकारःसंभवतिअतस्त्रिक्रमएवा
यम् महीमषु ऊंइ तूं स्तमातर एवंतिक्रमेषुप्रयोजनंनानिदृष्टव्यानि॥ ॥ पुनःसपदेनोत्तर
म् यत्रसुपदनिमित्तस्त्रिक्रमश्चत्वघ्नमोवाकृतत्तत्रपुनः स्वपदेनोत्तरपदंसंदधाति यथा मोषू
णः मोऽइतिमो स्तुनः गोमद्षणासत्या गोमदितिगो मत ऊंइत्योस्तुनासत्या पूर्वस्योत्तरसं
हितस्यास्थितोपस्थितमवगृह्यस्यएवन्द्विक्रमाद्यनन्तरंपरिशिष्टंक्रमविधिमाह पूर्वस्योत्तरसंबंध ९५
स्यततःपश्चास्थितोपस्थितंकर्त्तव्यं स्थितोपस्थितशब्देनवेष्टकोभिधीयतेयथा अष्टतमायक

म्ग्गो अष्टततायोतिअष्ट तमाय उपयपयतोअधरम् उपप्रयन्तइत्युप प्रयन्तः एतच्च पदप्रद
र्शनार्थक्रियतेस्तुपदेशाकटायनः स्वपदेस्थितोपस्थितंशाकटायनआचार्येगमन्यते पूर्वस्योत्त
रस ऽहितस्यनिवर्त्तते यथा मोषूणः मोइतिस्थितिस्तु गोमदूषुणासत्या गोमादितिगो मत ऊं
इत्यूं ५ स्थितिस्तु एतदपिपदस्वरूपज्ञापनार्थं विनापिवेष्टकेनस्वरूपंज्ञायतइति शाकटायमतेन
साधनीय अन्ततःपददीर्घाभावे पूर्वस्योत्तरसंरसंऽहितस्यास्थितोपस्थितमितिवर्त्तेनिनिवर्त्तते प
दमध्येदीर्घाभावः अन्तःपददीर्घाभावःतस्मिन्नतःपददीर्घाभावेपूर्वस्योत्तरसंहितस्यास्थितोपस्थितं
कर्त्तव्यं यथा मामहत्तामदितिः ममदत्तामितिममहन्नाम् मारान्यंविहृथ्यम् सदन्यमितिसदन्य
म विनामो पूर्वस्योत्तरसंहितस्यास्थितोपास्यनामितिवर्त्तते विनामहेतदेत्यस्यमूर्द्धन्यभावउच्यते
विनासंचेतदित्थंभूतंगृह्यतेपत्तन्निमित्तेनावेकपदस्याभवतः पूर्वस्यविनामेउत्तरपदसंहितस्यास्थि
तोपस्थितंकर्त्तव्यंयथा मिषासन्नोवनामहे सिसासतइतिसिसासंतःस्वधावसोमम स्वमायेति

Indira Gandhi National
Centre for the Arts

समाव प्रगृह्ये प्रगृह्यमित्यधिकृत्ययद्विहितंतस्यायंविधिः पूर्वस्योत्तरसंहितस्यस्थितोपस्थितमि
प्रा तिवर्त्तते पूर्वप्रगृह्यउत्तरपदस ंस्थितोपस्थितंकर्त्तव्यं यथा इंद्राग्नीअपात इंद्राग्नीइतींद्राग्नी
शा उउत्वा ऊंइत्यूत्वाविश्व अग्नीरोचनो अग्नीइत्यग्नी रोचनेदिवः रिफितेः निरुक्ते विसर्ज्जनीयोरि
९६ फितइत्यस्मिन्नधिकारेयानिपदानितेषामत्रग्रहणं पूर्वस्योत्तरसंहितस्यस्थितोपस्थितमितिव
र्त्ततेसप्तमीकृतविभक्तिप्रत्ययं पूर्वरिफितेपदेनिरुक्तेसंहितायामनिर्ज्ञातरेफउत्तरपदस
ंस्थितोपस्थितंकार्यं यथा अन्नस्ते अभिरित्यन्नः तेद्यावापृथिवी नेष्टः पिवः नेष्टरितिनेष्टः
पिवऋतुना सर्वेएतेवेष्टकाःपदप्रकृतिज्ञापनार्थाः अवसानेच विरामोवसानमित्युच्यते
अवसानेस्थितंकर्त्तव्यम संहितायामवसानज्ञापनार्थं यथा अत्वयेजातवेदसे जातवेद
सइतिजात वेदसांयथासम्नातंक्रमावसानंसंक्रमेषु अवसानेसतियत्रसंक्रमउच्य ९६
ते क्रमसंधिषुविषयभूतेषुयेनप्रकारेणक्रमावसानंपरिपठितंतेनैवभवति यथा वि

श्वधाः परमेणक्षाधोक्तधारम यद्स्वधारंदेवः अथत्तनस्त्वपंवादः शृइंटङ्गिरित्युक्तार्थः आ
नंदपुरवास्तव्यभद्रवज्रटसुतउअटकृतौ प्रातिशाख्यभाष्येचतुर्थोध्यायः॥ ॥ ॥ ॥ ॥ ॥
समासेवग्रहकृस्वसनकालः संहितापदलक्षणवक्तव्यमितिशास्त्रमारब्धंकात्यायनेनाचा
र्येण तत्रसंहितायामाधिकृत्यंपदाच्चपदाद्योः संधिरेत्येवमादिनाग्रंथेनसंहितालक्ष
णमुक्तंस्वरश्चस्वरवर्जंतमेकोदात्तंपदमित्यनेनाध्यायेनविहितः क्रियावाचकमाख्यातमु
पसर्गोविशेषकृत संत्वाभिधायिकन्नामनिपातःपादपूरणइति नत्राख्यातंभवंति यथा
पाहि रक्ष यज यजेति उपसर्गोभवति परोपापावप्रतिपरीत्यादयः निपाता भवंति
वावघामुवित्समस्मादित्यादयःनामंत्रिप्रकारंभवति कृत्तद्धितसमाससंज्ञाभेदेनभिन्नं तद्य
था कृतिभवति यज्ञः वेदः याश्च भूतिः तद्धितेभवति यथा आग्नेयः अग्नीषोमयोः ऐ
न्द्राग्नः वैश्वदेवाः समासोभवति विश्वकर्म्माविमनाअंहिहायाःसहदृनत्रसमासपदेवग्र

Indira Gandhi National
Centre for the Arts

प्रा
श
८

ह्रोभवति द्वयोःपदर्थयोर्वेटवांवापरस्परस्परकांत्तयांसंवज्ञातांयत्रह्वाविपदसह्रोच्चारणं
समा सचसमासः सवसमाश्रुतः प्रकारोभवंति यथाअव्य भावतत्पुरुषद्वंद्वबहुव्री
हयः तत्रपूर्वपदप्रधानेऽव्ययीभावोयथा समंभूमि विष्णुरूपं अन्तःपवं अनुरूपं उत्त
रपदप्रधानस्तत्पुरुषः अघशंसःव्रतपतेआव्येरेष्टाः उपप्रयन्तः उभयपदप्रधानो
द्वंद्वः यथाअग्नीषोमेः इंद्राग्नी मित्रावरुणौ दीत्तातपतोः अन्यपदप्रधानोबाहुब्रीहिः
यथाः अनमीवाः अयत्माः कृत्तग्रीवाः शितिकंत्तः एवमेतस्मिंश्चतःप्रकारेपिसमास
पदेवग्रह्रोभवति द्वयोःपदयोपृथग्ग्रहणम् अवग्रहेनाग्रहइत्यर्थः सवक्रस्वसमका
लोक्रस्वत्तत्तुल्यकालोभवति यथा ऋटक्तामसित्यृक समाभ्यां संतरन्नइतिसं तरतः अ
धिकारस्त्वत्रमेततत तरतमयोश्चातिशयेदत्तिणप्रत्यासंगो तरतमयोश्चप्रत्ययोश्चप्रत्य ९०
योःपरभूतयोरतिशयवाशिरोरवग्रह्रोभवति नचेद्दत्तिणशाब्दस्तत्रप्रत्यासक्तोभवति तरे

भवति पूर्णतरतिपूर्णं तरं तमेवभवति वह्नितमसितिवह्नितममत् सन्नितमनितिस
न्नि तमम् अतिशयइतिकिं कारोतरेणादधतः वदापिपयनातरं अदत्तिणप्रत्यासंगाइ
तिकिं ग्रावापृथिव्योर्दत्तिणपार्श्वेविश्वेषांदेवानामुत्तरम् अयमानार्थमारक्तः वीतमहू
तमस्तृतमगोपातमरत्नधातमवसुधातमाः पूर्वेण एतानिपदानितमंयःपूर्वेणपदेना
वगृह्यते यथा वीतमः दयवीतमइतिदेववीतमः हूतमंयथा देवहूतमतिदेव हूतमम्
स्तृतमंयथा इंद्रायपूतमं तृस्तृतमसितिस्तृ स्तृतमम् गोपातमोयथा स्वगोपातमइति
स्व गोपातमः रत्नधातमंयथारत्नधातमसितिरत्नधातमम् वसुधातमंयथा वसुधातमइ
तिवसु धातम् अधस्तनस्यत्रस्यापवादःसर्प्पदेवयजनेभ्यश्च सर्प्पदेवयजनेभ्यश्चेतत्पदं
पूर्वेणपदेनावगृह्यते यथा सर्प्पदेवजनेभ्यइतिसर्प्पदेवजनेभ्यः वक्रप्रकृतिवागतेन द
तस्यापवादः तृणवधाद्युत्तरेण तृणवक्षसित्येतत्पदमुत्तरेणपदेनावगृह्यते कोशाय तृणव

Indira Gandhi National
Centre for the Arts

प्रा
शा
९८

धामितिलक्षणेव धाम रायस्पोषदे इविज्ञावेति च रायस्पोषदे विनावत्येतेद्वे पदे च शाकल्याद्दुत्तरेणपदे
नावगृह्यते यथा रायस्पोषवद्इति रायस्पोष दें विज्ञावेतिविज्ञा वा स्त्तुतस्तनयोविज्ञावा ब
हुप्रकृतिर्वांगंतनापर्वणा बहूनि पदानियत्रतद्बहुप्रकृति पदं तभागंतनापर्वणामसमल
क्षणेनवत्पश्चात्कालिकं पदं भवति तेनावग्रहोभवति यथा प्रजेतिप्रजा प्रजापतिरितिप्र
जापतिगृहीतयेतिप्रजापति गृहीतया समासलक्षणेनयद्भागंततदिह गृह्यते आगत
यागनैवभवति नतपारितेनैवतद्भवति यथा सुप्रजइतिसुप्रजाः सुप्रजानामितिसु प्र
जानाम् नद्वतिवद्धितेन्यायसं हितेचेत् नद्वतीत्यत्रैकवशाद्वस्यतंत्रेणाद्वारणंद्रष्टव्यं
नद्वतिवत्वर्थीयेतद्धितेचतोप्रत्ययेपरभूतेवग्रहोभवतिन्यायसंहितेवेत्पादंभवति यथा
मधुमदितिमधु मत् हिरण्यवदितिहिरण्यवत्वनोवल्वपि यथा वरिष्ठामनुसंचम सं ९८
चतमितिसं चतं नद्वतिकिं एतावान् अस्य महिमा न्यायमंहितामितिकिं भजन्त

नम पयस्तत्रं शास्त्वत्रानानिष्ठुव शःत्वंत्रा नाति एतेप्रवतद्धितेषुपरभूतेष वग्रहोभ
वति शःयथाहोतारः ऋतशःइत्यृत शःस्वंयथा नत मर्त्यस्य देवत्वमितिदेवत्वम्
त्रायथा देवत्रेतिदेव त्रायत्रं अवसे नातिसयथाप्रैष्टुतातिमितिस्वैष्टु तातिम्रु वादिं
घदम् धात्वर्थेयकारेस्वरपूर्वोप्रातिपदिकंसिधातुर्भवति योयस्मिन्यकारेउटपदीयते
सतस्मिधात्वर्थेयकारं सुपआत्मनःकाजित्यादिनिः सूत्रैर्याविहितास्तइहगृह्य
ते तस्मिंधात्वर्थेयकारप्रत्ययेस्वरपूर्वेवग्रहोभवति यथा वृषायमाणः वृषायमा
नइतिवृषायमानः वृषभः अघयतः अघंयतइत्यध यूतःऊरुष्याणोअघायतःसम
स्मात धात्वर्थइतिकिं यदक्रंदः प्रथमंजायमानः स्वरपूर्वइतिकिं वाद्यतिरूपोदगा
म वां सोचभूतकालोत्तेणाद्भस्यादत्तपि वांसोचप्रत्ययेपरभूतेवग्रहोभवति भूतका
लर्थाभिधायि निस्वरेणाक्रमवद्भस्यानुचरात्मभूतेस्वरेणवाडस्वेनोपाहितेएवंविभक्तिवा

Indira Gandhi National
Centre for the Arts

प्रा त्ययेनद्योजन अनुषिवाꣳसोचअषिभूतेवग्रहोन[illegible]ज्ञिवाꣳसइतिजज्ञिवाꣳ
शा सःसस्ववाꣳसमृवाꣳसइतिसस्ववाꣳसः भूतकालइतिकिं स्तविद्वाꣳसइतिस्तविद्वाꣳ
६६ सः स्वरेणाह्रस्वादिति किं जिगीवासः स्विरादितिकिं विकिलासादय अनुघातिकिं स्ह
र्यआत्मानजगतस्तस्थुषः प्रतिपूर्वेविश्वेमत्तुभ्यस्था प्रत्ना पूर्व विश्वाइम ऋत्वएतेभ्यः प
रेथाप्रत्ययोग्रहोभवति प्रत्न यथा प्रत्नथेतिप्रत्न थाप्पूर्वथेतिपूर्व था विश्वथेतिविश्व था
इमथेतीमथाऋतथेप्रत्यथा ह्रस्वव्यंजनाभ्यांभकारादौविभक्तिप्रत्यये ह्रस्वात्स्वराद्व्यंज
नाच्चपरस्तेविभक्तिप्रत्ययेभकारादावग्रहोभवति ह्रस्वाद्भवति यथा ततसइतितत्सभ्यः
अग्निभिरित्यग्नि भिः व्यंजनाद्भवति तिष्ठद्भ्यइतितिष्ठत् भ्यः धावद्भ्यइतिधावत् भ्यः ह्रस्व
व्यंजनाभ्यामितिकिं रथकारेभ्यइतिरथ कारेभ्यः भकारभ्यः भकारादौविभक्तिप्रत्ययइति ६६
किं कर्णाग्राह्ईभःकुंभोग्रनिष्टुःभ्वितिवानतो स्तइत्येतस्मिश्चविभक्तिप्रत्ययेअनतोऽवग्र

होभवति यथा अपिवत्यपु स्त अग्ने हस्विवितिहत स्तशोकैःअनाताविति किं ऋत्त अ
निषु वर्णसंख्येन्यतरतः वर्णसमासः संख्यासमासमासश्चान्यतरतोविकल्पनाद्दृश्यु
न्ते वर्णसमासोभवति धूम्रारोहितइतिधूम्रारोहितः कर्कःधुरोहितइतिकर्कःधु रो
हितः संख्यासमासश्च पंचदशेतिपंच दश त्रयोदशेतित्रयः अनुदात्तोपसर्गोवाख्या
ते अनुदात्तउपसर्गोयस्मिन्तदनुदात्तोपसर्गमाख्यातं तस्मिन्नवग्रहोभवति यथा
वासः उपस्तृणातीत्युप स्तृणाति अवधावतीत्यवधावति गिरित्रशयोः गिरित्रशयोः प्र
त्ययोरवगृह्यते यथा शिवं गिरित्रेतिगिरि त्र गिरिशेतिगिरीश अक्लावदामसिइयव
कारास्त्रेडितायनेषु इव कार आम्रेडित अयन एतेषुचत्ययेअवग्रहोभवति इवेभ
वति यथा स्तचीवेतिस्तुचि इव घृतस्य वम्रीवेतिवम्रि इव सोमःकारोभवति हिकारा
येतिहिं काराय वषट्कारेभिरितिवषट् कारेभि आकृतीःआम्राडितभवति यज्ञायज्ञाये

Indira Gandhi National
Centre for the Arts

आ तियद्दा यज्ञाय व:सङ्ंसमितिसम सम अयनेभवति आयनायेत्या अयनाया एकास्म
शा मीची एकशाह्वात्समीची एकशाह्वात्समीचीप्रत्ययेवग्रहोभवति यथाशिरगम एकम्
९० समीचीइतिसम इच इव इएकादितिकिं समीची इतिसमीची उरसा त्मानां चायव:
शंयोर्वेकिर्द्वात्मद्युष्टन्मयीं:स्वन्नयाश्रुयासाधुयाधृष्णुयाविशालमनुया चायव:शंयो: वि
दिर्द्वो अस्मद्यु स्मन्मयी स्वन्नया: आश्रुयासाधुया धृष्णुया विशालम अनुया तानिपद्दा
निसावग्रहाणिभवति यथा स्तुतो इमो चायवइति यव: यथाशिवं शगमनुशयोरिति
शम् यो: यथा वर्हिर्द्वतिवर्हि: धा यजात यथा अग्निं भरन्तम् अस्मद्युमित्यस्म द्युम य
थास्मन्मयीतित्मयं योनिम अभये यथा स्वन्नयेतिस्वन्न या यथाआश्रुयेत्याश्रु याए
लतियथा ध्रुवंयोनिम आ सीद साधुयेति साधु या यथाधृष्णुय वन्नहृत्सधृष्णुया १००
यथा विशालमितिवि शालम छंद: यथा अनुयेत्यनु य रात्रा रात्रीन स्मगायुमभया

इतोपामार्गकिंपुरुषमितिव स्वगयुं उभयादत: अपामार्गाकिंपुरुषम एतानिपद्दानि
स वग्रहाणिभवन्ति यथा स्वगमितिस्वग युम यथा येकेच उभयदतइत्युभय दत:
यथा अपामार्गोत्यपामार्गा चम यथा किंपुरुषमितिकिं पुरुषं पारावताग्निमारु
ताश्चेतिजातूकर्णस्य पारावतान् अग्निमारुता: एतेवह्वेपदेसावग्रहेभवत: जातूकर्ण
स्याचार्यस्यमतेन यथा अङ्क पारावतानिपारा वतान् लल्माघा: आग्निमारुता इत्या
ग्नि मारुत: जातूकर्णस्येतिकिं पारावतान् अग्निमारुता: अधीवासमित्येके अधीवासमि
त्येतत्पदमेके आचार्या:सावग्रहंकुर्वन्ति यथा अधावा सम अधीवासमित्यधि वासम एक
इतिकिं अधीवासमप्रतिषेधेनावग्रह: समासेवग्रहंइतियोवग्रहाधिकार: कृतत्सस्याय
सयवाद: प्रतिषेधवाविनोतिपातेनसहसमासेसतिअवग्रहोनभवति नगत्तसा अरह
सा मनसा नइरा अनिवाअमीवा: निषीदम अनलोपोनञइतिनकारलोप: तस्मान्नुड

Indira Gandhi National
Centre for the Arts

वीतित्तुङागमः प्रतिषेधवाचिनो निपातादुत्तरेणाकारेणसमासेनभवत्यवग्रहः यथाः॥ अना
ततायाधृत्तवे अनाधृष्यः जातवेदाः द्वापूर्व वाह्वापदपूर्वसमस्तपदस्यावगृह्यते यथाद्वा
दश द्वाविंशति द्वात्रिंशत संख्यापूर्वपदस्यधा संख्यापूर्वोत्तरधापदसमासेतिनावगृह्यते
यथा अष्टधा दिवं द्वोमासः कविधा संख्यापूर्वइतिकिं इदं अहं प्रथवाः वहिर्द्धेतिवहिः
धाद्वंद्वानिद्विवचनान्तानिस्वरान्तपूर्वपदानि द्वंद्वसमासपदानिद्विवचनान्तानिस्वरान्तपूर्वपद
निनावगृह्यंते यथा अयम् वाम मित्रवरुणा इंद्राग्नी अग्नीषोमयोः द्वंद्वानीतिकिं अ
द्भुतमसि हविर्द्धानमितिहवि धानं स्वरान्तपूर्वपदानितिकिं ऋक्सामयोरित्यृक्सामयोः
तद्धितेचैकाक्षरपूर्वावतिद्धिते समासादुत्तरकालतद्धितउत्पन्नेवग्रहोनभवति यत्रतद्धि
तजनितेवएकाक्षरेपूर्वपदेवग्रहोभवति यदिचतत्पूर्वपदेनसहअनिहितंभवति अथवहि १०९
तंभवति यदिपूर्वपदस्यउत्तरपदमव्यवहितंभवतीत्यर्थः यथा त्रैष्टुभेन छंदस

भगः सौभाग्यंस तद्धितइतिकिं गायत्री त्रिष्टुप् त्रिस्तुविति त्रि स्तुप् सुभगोतिसुभग
एकाक्षरपूर्वावितिकिं प्रजापत्यइतिप्रजा पत्यः अनिहितकिं साम्राज्यमितिसाम्रा
ज्याम् अत्रपूर्वोत्तरपादयोर्व्यंजनेनव्यवधानं ह्य अंचतिसहत्योः क्लोपे अंचतेर्धातोः
सहतेश्चक्वप्रत्ययलोपेसतिअवग्रहोनभवति अचतेर्नभवति यथा प्राङ् प्रत्यङ् ति
र्यङ् सहतेः सहतेःक्विपि यथा ऋताषाट् ऋतेधामा इन्द्रवनः पृतनाषाट्
अंचतिसहत्योरितिकिं सुकृदितिसु कृत देवःक्लोपइतिकिं अग्नेत्पाग्राव्य जातु
पृतनाषाह्याय पृतनाषाह्याय पृतनासह्यायेतिये पृतनसह्याया वं अनुकस्तुभा
म उरुस्तुइत्येताभ्यांपरयोरंचतिसहत्योः क्लोपेसतिअवग्रहोभवति यथा उरु
वांचमित्युरुवंचम अश्वेत सुरुव इतिम रुचः अधस्तनसंयोगस्यापवादः॥

Indira Gandhi National
Centre for the Arts

प्रा.
शा.
१०२

समिदाभ्यां वत्सरः समिदाभ्यां परीवत्सर इत्याद्येष्वावगृह्यते यथा संवत्सरः अग्निः॥ इ
दावत्सरः समिदाभ्यामिति किं परवत्सर इति परिवत्सरः प्राग्निभ्यामनिधौ प्रश्लेषे
प्र अग्नि इत्येताभ्यां प्रश्लिष्टसंधाववग्रहो न भवति इत्यादीनि विनिधानं वर्जयित्वा
रा शब्दाद्भवति प्राणः अग्निशब्दाद्भवति अग्नीद्धं यत् सरस्वती प्राग्निभ्यामिति
किं अपान इत्यप आनः वी पायेतिवि इध्माय अनिधाविति किं प्रेद्ध इति प्र
इद्धः अग्ने प्रश्लेष इति किं आर्त्या इत्याक्रान्त्यै॥ ॥

१०२

पाङ्क्तानद्गोभ्रायसा पूर्वशयात् पाङ्क्तान् उद्रः अभ्राय एतानि पदानि संशयान्नावगृह्य
न्ते पङ्क्तेः पूर्वपदं त्रायतेरुत्तरपदं पङ्क्तेः पूर्वपदं न्नरतेरुत्तरपदम् यथा उत उर्द्धं
वतीत्पूर्धावाह्यः पूर्वपदं इवतेरुत्तरपदं यथा उद्गातीस्मृत पूर्वपदं रातेरुत्तरपदं तथा
अभ्रशब्दे अपाविभक्तावीति अपः पूर्वपदं विभर्तेरुत्तरं यथा अभ्रभ्रंश्रं गतस्यार्थः अर्थ
तेरेवा भ्रं एवमेतानि पदानि पूर्वोत्तरसंशयान्नावगृह्यन्ते हेतुवचनात् अन्यत्रापि
यत्र संशयस्तत्रावग्रहो भवति यथा अविद्राय पाङ्क्तान् उद्रं मासौ कश्यपः अ
भ्राय स्वाहा एतान्युदाहरणानि जनयत्याओषधयोऽदृषापिषत नहि वनास्मभ्य
मज्ञावयोवलगम् जनयत्यै ओषधयः अदृषापिषत नहि वन अस्मभ्यं अज्ञा
वय वलगत् एतानि पदानि नावगृह्यन्ते यथा जनयत्यै त्वा यथा ओषधयः
सम् यथा भागम् आ आदृषापिषत यथा नहि तेषाम् अमा वन कदाच

Indira Gandhi National
Centre for the Arts

प्रा० न लरी: यथा अस्मभ्यम् वाजिनीवति ह्रस्वव्यंजनाभ्यामकारादौ विभक्तिप्रत्ययइ
शु० त्यस्यापवाद: यथा उपहूता: अज्ञावय समासेवग्रहइत्यस्यापवाद: यथा वलग
१०३ म् उत् किरामि समानोऽनश्वमेधे समानशब्दोश्वमेधमंत्रवर्ज्जमन्यत्रनावगृह्यते
यथा यम् मे समान: यमसमान: अनश्वमेध इति किं समानोयत्तेनकल्पन्नाम्
समान् इतिसम् आन एकस्मैद्वाभ्यां वायुरसज्ञात:समुद्रमहोरात्रेविश्वानरोविश्वा
हायगणोसपत्नागोधागोधूमाश्वाशुशुक्षणिर्न्यग्रोध: पुरोडाशंप्रावर्णातिरश्रीतस्क
रामस्मसा स्वत्य उपस्तिम्र्माकिर्विश्वामित्रोगोपं प्रउगमंगानिकद्रीवभमद्धान्य
वीरवत् व्रीहयेणप्रोष्ट्रनायनंघ्यनर्ईष्टइ:न्याद्दर्क्षघनाम:कुयवंकुचर प्रियंगवो
नीवाराएकादशघोडशावंइमाश्वायुवोव्याघ्रोनकुलानाविष्टिरो:कपर्दिनेपुलस्त्यो
निवंगिरोकुलालेभ्यकर्मारेभ्य:पुंजिष्ठेभ्योद्वाभ्यायकिंशिलायैलष्टद्दा: शूका १०३

गायशृङ्गनायवरावरेभ्य:परातावोलत्रिकारवुरजगरोविपन्यवोदात्यणआयुध
ॐ स्वराम्ंष्ट्रहस्यतिर्व्वनस्पतिर्न्नराश ॐस: स्वरभिन्नरिष्टाये सूत्रस्यपदानिकृत्वापश्चा
द्व्याख्यानंकर्तव्यमित्यस्मिन्पक्षके इत्येतानिपदानिनावगृह्यंते वायु: इषा स्वल
ये यथा यम् असज्ञात:नियच्छान समुद्रं गच्छस्वाहा यथा अहोरात्रे पार्श्वे श्री
यथा अर्चे विश्वानराय यथा विश्वाहा शर्मयच्छत यथा आयगणोसि यथा
असपत्ना: सुमनस: यथा गोधा कालका यथा गोधूमाश्च मे यथा आ
शुशुक्षणि: त्वम् अज्ञा: यथा न्यग्रोध: वमसै: यथा यच्चन् पुरोडाशम् यथा
प्रावर्णेभि: प्रवर्णेभिरितिप्रवर्णेभि: सजोषस: यथा अश्रीतस अश्रितमे
त्वशितमा यथा तस्करा: वने यथा मस्मस कुरु यथा अश्वत्थे व: निषदं
नं यथा उपस्ति: अस्तु स: अस्माकं यथा अग्ने माकि: नेमयाथि: यथा विश्वा

Indira Gandhi National
Centre for the Arts

प्रा० मित्रः ऋषिः यथा गोषा ऋतस्य दार्दिविं यथा प्रऊगम् उक्थं अन्यथापि वै
शा० यथा अंगानिचमोयथाःकल्पवन्त यः अग्निजः यथा अश्वद्वो अश्वतो अश्वधा
१०४ त् यथा लांगलंयवीरंवन् यथाहारेण धाष्टन्ताः द्वेपदे। यथा नराचनः दो
भणः यथा देवद्ध च यथा अन्यादृङ् च द्वेपदेनन्तर्हिते यथा सिंधोरिवप्राध्व
ने शूघनासः यथा क्रयवम् वमोयथा मृगः न भीमः कुचरः यथाप्रियंग
वः च मे यथा नीवाराश्चमे यथा एकादशाचने यथा षोडशाचमे यथा वं
इमाः अप्सु यथा आयुवोनाम यथाव्याघ्राः हेतिःयथा अनड्वाहम् अन्वा
रसामहोयथा गविष्ठिरः नसमा स्तोमं यथानमःकपर्दिनेच यथा पुलस्तये
वायथा नमः निषंगिणे यथा कुलालेभ्यः वथः कर्मारेभ्यः द्वेपदेनन्तर्हिते १०४
यथा पुंजिष्टेभ्यः वाच यथा ह्नीप्याय। वा यथा नाप्याय च यथा किंशिला

यव प लष्टदाः आयुर्युधः यथा शृकाराय स्वाहा शृकृताय स्वाहा यथा च
राचरेभ्यःस्वाहा यथा अद्भ्यः पारावतान् यथा गोलन्तिका तेअप्सरसां यथा
आखुः ते पशु यथा अजगरः वसूनाम् यथा नत विप्रासः विपन्यवः यथा
यत्रावध्नन् दाक्ष् याणाःयथा परमे व्योमन् आयुर्धं यथा यत सुराम यथा
बृहस्पते अति यत् अर्यः यथा वनस्पतिः शमिता देवः यथा नराशं
सस्य महिमानम् यथा आजः सुरभिःनिःहरः यथानरिष्टायै भीमतम् येषु
हेतुभिरन्तोनिपदानिनादृश्यन्ते तान्हेतूनन्यपदस्यव्यक्ति नाविव्याख्यावाच्यो
वक्ष्यमाणैःसूत्रैर्वक्ष्यति येषुवपदेषुवक्ष्यमाणहेतवोनसंतितेज्ञातिवत्त नाः
प्युत्यितव्याः॥ ॥ उत्तभनादीन्यादिम१शयात् उक्तंभनादीनिपदानिश्चादि
संज्ञायान्नावदृश्यन्ते यथा वरुणस्य उत्तंभनमसि उत्याय बृहती भव उत्थि

Indira Gandhi National
Centre for the Arts

प्रा० नाय स्वाहा एतानि पदानि भवन्ति त्रीण्युदाहरणानि तत्पूर्वपदानि स्तभ
शा० मुत्तरपदं प्रथममुदाहरणम् तिष्ठत्तुत्तरपदे तत्रोदस्मादस्तोः पूर्वस्येतिपा
१०५ णिनिः पूर्वरूपमतं विदधाति अन्येतु कारलोपं विदधाति अतत्तुत्तरपदस्यादिसं
ज्ञयादेतानि नावगन्ते यथैतान्येवमन्यान्यपि द्रष्टव्यानि ॥ ॥ विशौजा इत्यन्या
यसमासात् विशौजा इत्येतत्पदमन्यायसमासान्नावगृह्यन्ते विशौजा इति प्रा
प्नोति इंद्रोसि विशौजाः ॥ ॥ दित्यौही तुर्यौही पष्ठौही इत्युपशनेति च दित्यौ
ही तुर्यौही पष्ठौही इत्युपशनेएतानि पदान्यन्यायसमसान्नावगृह्यन्ते
अत्रउतर्णअकारे प्राप्ते ओकारोन्यायसगमाः दुष्टरो विष्टरो विष्टयो विष्टंभो विष्टंभ
नीम् दुष्टरः विष्टरः विष्टयः विष्टिभिः विष्टंभनीम् एतानि पदानि नावगृह्यन्ते
अत्रपराचर्येणकारणेनोपन्यस्तम् तत्रतावद्दुष्टरं पदं धातुसंज्ञायं नावगृह्यते १०५

विष्टरादानितु आन्यायपत्वसंश्लिष्टानि अतः एवाग्रमोपि पदकारैर्न्नेष्टतः ॥ ॥
अथ्वध्यमुगणाउत्व इष्कृतिरिष्कर्त्तारमुदरमित्युपसर्गौकदेशलोपात् ऊवध्य
उगणाः उत्व इष्कृतिः इष्कर्त्तारम् उदरम् एतानि पदान्युपसर्गैकदेशलोपा
न्नावगृह्यते अत्र इष्कर्त्तारमित्येतयोपदयोर्न्निरुपसर्गास्यनकारलोपान्नवगृह्य
ते शेषाणांतु उद उपसर्गान्त्यवर्णलोपान्नावग्रहः यथा ऊवध्यम् वातम् नतु
गणाभ्यः अंगिरस्वद्ध्रुवत्वे इष्कृतिः नामतुः इष्कर्त्तारम् अध्वरस्यप्रष्टीः मे रा
स्त्रउदरम् संस्कृतं इष्कृतिर्म्मोसिपचन्याः पुंश्चल्मित्यत्र नासिकोपधत्वात् एता
नि पदानि नासिकोपधत्वाद्धेतोर्न्नावगृह्यते अत्रचशेषपकारात्कारोपधादित्या
दिभिः सूत्रैरुपधानासिकमुक्तं पदेवानुस्वार अतोदांजसनेयिनामुपधानुना
सिकन्नावगृह्यते काएवांनाववस्यमातेनसूत्रेण यथा ततुनोसंस्कृतं सा

Indira Gandhi National
Centre for the Arts

प्रा० प्रथमासँस्कृतिः मांँसचन्याः नखाग्रां नर्माय पुंश्चल्मं अनुस्वारागमन्यादित्
शा० के अनुस्वारागत्वाद्वेतोरित्येके आचार्याएतान्येवपदानिनावगृह्णन्ति यथा यँ
१०८ स्कृतं संस्कृतिः साँम्यवन्यानु. थाभूम काण्वादीनाम्नातेनायंपादः॥ ॥ परीतो
अवत्तानाञ्छन्दुविताय सन्धिरितिच परीत्तः अवत्तानाम् सुविघासन्धिः एतानि
पदानियथायोगंकरणेनावगृह्यन्ते तत्रधान्वभावात् परीत्तः अवत्तानां सन्धिः
एतानिपदानिधात्वेकदेशलोपान्नावगृह्यंते सुवितायेत्ययमुपसर्गः सइत्ययंसू
तायथागृह्यंते सूतायप्रजायै इतिधातोश्चात्रसंदेहान्नावगृह्यते इतिशद्वः प्रदर्श
नार्थः अतेतानिपदान्येतेहेतुभिर्नावग्रहः एवमन्यान्यपिद्रष्टव्यानि तथाचोक्तं
आदिमध्यान्तलोपाविसमासात्पावयंतिव नावगृह्णन्तिकवयः पदान्यागमवंति
च वृद्धवृद्धिरित्युक्तार्थः आनंदपुरवास्तव्यभट्टवज्रटसुतउवटकृतौकृतौ १०८

प्रातिशाख्यभाष्येपंचमोध्यायः ५ ॥ ॥ अनुदात्तमाख्यातमामंत्रितवत्
स्वरितवर्ज्जमेकादात्तंपदमित्यत्रनामाख्यातोपसर्गानिपातानांसामान्येनस्व
रो विहितः यथा नोनोमेमदर्थइत्यादिभिर्नामग्नां विशेषस्वरोविहितः तथाच
वाचकमुविहित्यादिहृवेणनिपातानां विशेषस्वरोभिहितस्तत्वपिपादनार्थमा
ह अनुदात्तमाख्यातंमामंत्रितवदिति आमंत्रितपदवदनुदात्तः आख्यातपदंभ
वति यैरेवकारणैरनुदात्तमामंत्रितंभवति तैरेवकारणैराख्यातमपीत्यर्थः॥ प
पदएवंमामंत्रितमनानवदार्थेपादादावित्यामंत्रितस्यानुदात्तवत्वमुक्तमिहापि
तथैवभवति एवगुहांभवति माधाःस्तेनःदिशत गोपतोस्यातं अन्तानार्थइति
किं माहिंयन्तमपाहियन्पतिम् पादादाविति किं कस्यामातईहेःसुघावसो
समस्तिभिःउपसर्गोनुपसर्गे उपसर्गोऽनुदात्तोभवतिउपसर्गेप्रत्यये एतच्चप

Indira Gandhi National
Centre for the Arts

प्रा० शा० १७ दसेएवत्रइव्यम् यथा संप्रवावधम् संप्रयात अन्नसमुपसर्गः प्रउपसर्गे अनुदात्तो
भवति उपसर्गइतिकिं प्रसितिरितिप्रसिति आम्रेडितेयोन्तरः आम्रेडितेवरेउत्तरउप
सर्गोनुदात्तोभवति सऽसगितिसं समनुपोपेत्युप उप अधस्तनस्ययोगस्यापवाद
:कृदाख्यातयोश्चोदात्तयोः कृतिउदात्तयोः कृतिउदात्तयोवत्याख्यातेचोदात्तवति
परभूतेउपसर्गेअनुदात्तोभवति सं:आभरन्तः विभ्राजमानः सरिरस्य आख्यातेभ
वति यथायेवार्यतेपचनऽसंभवरन्तिः यद्ववयमुदस्यापवाति कृदाख्यातयो
रितिकिं अनुगावः अनुभगः उदात्तयोरितिकिं प्रयतिः प्रसितिः द्विवाइष्टुगमा
म् परिभाषितत्वात् नाभ्येकाक्षरः स्वरसंधयेचाकृति अभिउपसर्गएकाक्षरश्चोप
सर्गः स्वरात्मकेउपसर्गस्वरसंधयेवाकृविप्रत्ययेउदात्तेनानुदात्तोभवति अभेः
स्वरात्मकेभवति अभि आ वार्तस्य स्वरसंधये आकृतिप्रत्ययेउदात्तोनभवति या १७

मिर्मित्राःवरुणावभि असिंवन् अभि ऐतेनाम् अभैतेनाम् अभैतेनाम् एकाक्षर
स्यस्वरात्मकेभवति यथाविश्वा आकरोत् नि आ आसीदत्र एकाक्षरस्यस्वरसंध
येभवति सत्यधर्माणानइ यत्पुरुषं वि अदधुः आहृतजातयोः आइत्ययमुप
सर्गः हृतजातयोः प्रत्यययोन्नानुदात्तोभवति अहृतपमि, आजातोविश्वा अ
धिरिप्रप्रातिश्रितान्तिभानपचनेषु अभि नि प्र प्रति एतेउपसर्गाश्रितान्ति
ण भान पचनाएतेषुप्रत्ययेषुनानुदात्तोभवति यथा अधिश्रितम् यथा
पासद्विष्यन्त्विणं प्रभानवः सिस्रते प्रतिप्रचता उक्तोपमावर्त्तः अपनीफण
न्सऽसनिष्पदन्सर्ववर्त्तप्रयाणऽसंवरत्नऽसऽरभ्युधंप्रसितिवंक्रमस्तित्वेतेषु
एतेषुप्रत्ययेषुअनुइत्ययमुपसर्गोनानुदात्तोभवति यथा अग्नीषोमयोरि
स्तितिमनुइत्येममुहर्यस्याइतमन्वावर्त्तं पश्चामंकाशस्यन्तापनीफणवत्

Indira Gandhi National
Centre for the Arts

प्र॰
शा॰
१०८

अनुस्ऽमनिष्यदेव वरिष्ठामनुसंवतं अनुप्रयाणमुषसः योनिमनुसंचरन्तं
इन्द्रं सखायो अनुसऽरभध्वं तस्मीमनुप्रसितिं पृथिवीमनुविक्रमस्व ऽपप्र
दात्ते आ उप एतौ उपसर्गौ प्र उपसर्गे उदात्तप्रत्ययेनानुदात्तौ भवतः यथा अ
र्थ आंप्रयातुपरावतः आप्रयन्तु दक्षिणात् उपप्रयाहि उपप्रागात् अभिवेतु
पसंप्रयात प्रत्यातनुष्ठास्तुषाव । अभिपेहि उपसंप्रयन्तां प्रत्यातनुष्ठ आस्तुषा
वसोमद्भिः प्रकृत्याख्यातमाख्यातपूर्वम् अनुदात्तमाख्यातमामंत्रितवदि
ति तस्यायमपवादः प्रकृतिस्वरपूर्वं भवति यथा पिबतु सदन्त्वयन्तु उदात्ता
दामंत्रितादनन्तरम् उदात्तात् उदामंत्रितपदादनन्तरमाख्यातं प्रकृतिस्वरं भव
ति यथा ब्रह्मन्नश्वं भन्त्स्यामि देवाः सधस्याविविदद्रूपमस्य एकान्तरादपि अन्त १०८
केन पदेन व्यवहितादथामंत्रितपदात् परमाख्यातं प्रकृतं प्रकृतिस्वरं भवति

यथा ब्राह्मन्नश्वं भन्त्स्यामि देवाः सधस्याविदद्रूपमस्य एकान्तरात् अपिशब्दाद्व्यन
भवन्ति इंद्र आहि यद्वत्तोपद्वराद्व यदाद्वन्तं यच्च तं सर्वं विभक्त्यन्तं सर्वप्रत्ययान्तं
प्रतिपद्यते यमन्वेन यतः यथा यत्रादीत्यादि यमाजर्मनवः येनक्षप्रपस्पसा
यतो जातो अरोचथाः यथायंवायुरेजति यत्रक्षप्रयोजग्मुः यदिदिवायदिन
क्रम् अत्र सर्वत्र यदियद्वृत्तस्याख्यातपदेन सहसंबंधो भवति तदेवाख्यातपदं वि
क्रियते न तु संधानमात्रो यद्देकस्याधिपर्मणिनस्याव यजन मसि तथा चोक्तं
यस्यायेनार्थसंबंधो दूरस्थस्यापि तस्य तत् अर्थतो ह्यसमानानामानन्तर्यमकार
णमिति हिच हिशब्दात्परमाख्यातपदं प्रकृतिस्वरं भवति यथा आपोहिष्ठा
मयोभुवः तु ननु रपि तु ननुरोपि हि शब्द आख्यातपदं प्रकृतिस्वरं भवति यथा इंद्र
वो वा मुशन्ति हि नेन नेदित्यस्मान्निपातसमाहारात्परमाख्यातपदं प्रकृति

Indira Gandhi National
Centre for the Arts

प्रा॰ स्वरंभयवति यथा एघनेवपवेतयानि समनसस्करत करदित्येतदाख्याते
गा॰ सनसदत्येतन्पूर्वाकृत्याभवन्ति यथा असपत्नाःसनसस्करतसमनसइत्येत
१०६ त्पूर्वपदामितिकिं सुत्तत्रोभेघत्नंकरत द्वयोः पूर्वसमुच्चये द्वयोराख्यातपद
योःसमुच्चयार्थेवर्त्तमानयोः पूर्वमाख्यातंप्रकृत्याभवंति समुच्चयोनामद्वयोर
कस्मिन्नर्थेसमावृत्तः यथा शर्म वस्थः वर्म च स्थः शम ववस्त परि च वस्त
वापिवारणे द्वयोराख्यातयोर्धिवारणार्थेवर्त्तमानयोः पूर्वमाख्यातंगकृत्या
भवति वाशब्देनवेदाख्यातयोर्योगोभवतिसंहितायांप्रायत्रोदाहरणानि
लभ्यन्ते रूपोदाहरणानिवुद्दीयन्ते देवदत्तोवाभुंक्ते यज्ञदत्तोवाभुंक्ते अहवि
नियोगे द्वयोराख्यातयोर्विनियोगेवर्त्तमानयोः पूर्वमाख्यातंप्रकृत्याभवंति
अहशब्देभवेदत्तोहग्रामंगच्छतु वतदत्तोहगाःपालयन्तुः एवावधारणे द्वयोः १०६

राख्यातयोरेवधारणार्थेवर्त्तमानयोः पूर्वमाख्यातंप्रकृत्याभवति एवंशब्देनवेदा
ख्यातयोर्योगोभवति अवधारणन्नामद्वयोःकर्मणोःद्वयोश्चकर्त्रोः एकस्मिन्कर्म
णिएकाकर्त्ताभवति यथा देवदत्तग्रामंगच्छतु यज्ञदत्तएवंभुक्ते उपपदाद्वयोग
पिच वा अहा एव एतानिचप्रकृतीनियाम्युपपदानिअक्तान्याख्यातस्यविका
णितेषामर्थोयदिकिंचदवगम्यते तदाएतेषामुपपानामनुच्चारपिआख्याता
विक्रियन्ते हलभवथ पवित्रंभवथ यत्राशोत्रलुप्तः इत्थंभूतानिच्छेदस्युदाहर
णानिद्रष्टव्यानि॥ ॥परोपायावप्रतिपर्य्यल्पध्याङ्कुःसन्निर्दुरानिविस्वभि॥
परा उप अप अव प्रति परि अनु अपि अति अधि आङ् प्रसम् नितु दु
त उत् नि वि सु अभि एतेविंशतिरुपसर्गाः प्रकृतिस्वराभवन्ति तस्यचोप्स
र्गास्योपसर्गाइत्यादिकः उपलादपचाशेद्रष्टव्याः प्रकृतिस्वरस्तुव्याकरण

Indira Gandhi National
Centre for the Arts

प्रा० शि० ११० पवितोत्रनश्यन्ने निपातायुदात्तात्रुपसर्गाश्चभिवर्ज्जमिति तथायोक्तं विज्ञातेरुपस
र्गाणामुच्चाण्कारतीनव ग्राद्यादात्तादेत्वौतेषा सनोदात्तत्वभीत्यघमिति द्विसा
र्ग्गम् द्विस्पर्शत्व्यतेस्मिन्यदरूतिद्विस्पर्शस अधिकारस्त्रमेतत् विन्नविन्नस्मर्द्वी
वयात्रमभिन्त्यमूत्निद्देदात्र ७समाववत्सूद्विरराज्ञाग्रद्वेवुशुद्धबुद्धेनकृतिषामस्ति
न्नात्तसन्नाश्च वेत्तु विन्ना ग्रस्मयक पात्रं अभिन्त्य स्तृतिका ग्राद्वेदात्रम समा
वववत्निस्त्वद्धि स्थ्दि: ग्राह्मा ग्राह्मा ग्रद्वे शुद्व बुद्धबौ न क्तं निपक्ष स्वित्र ग्र
नु सन्ना: एनेषुद्विस्पर्शोभवति वेत्तु यथा प्रनिपि र्वेतविन्न द्वौतकारो
संयोग: विन्नागातुमित द्वौतकारोवकारश्चसंयोग: ग्रस्मक्तुस्वाबथाद्वादकारो
रफयकारोचसंयोग: पात्तु आसन्नायान्नुम द्वौतकारफश्चसंयोग: अभिन्त्यद ११०
व७समवितारम् द्वौतकारोयकारश्चसंयोग: सूत्निकाचमे द्वौतकारोसंयोग:

मिश्चादेवेतिराद्धम द्वौदकारधकारोवकारश्चसंयोग: सोमस्यदात्तुमसि द्वौतका
रोरेफश्चसंयोग: मत्रस्यक्तद्विरात्नि दकारधकारोसंयोग: स्तृद्वंवमेघ्श्चि दका
रथकारोसंयोग: ग्रगण्डाएदिधिषु:पतिं द्वौदकारधकारोयकारश्चसंयोग:
पराद्वेश्चेतामेरकोद्वौदकारधकारोसंयोग: शुद्धबाल: दकारधकारोसंयोग:
प्रचुड्डायस्वाहा दकारधकारोसंयोग: मधुनक्षं द्वौ ककारोतकारश्चसंयोग:
निघृणायस्वाहाद्वौणकारोसंयोग: स्विन्न:स्नातोमलादिव द्वौनकारोसंयोग:
अन्नपतेन्नस्य द्वौनकारोसंयोग: सद्य:सिंधु: द्वौनकारोसंयोग: स्वरात्संयोगादि
रित्यन्तस्यस्त्रस्य प्रायशोयवादसूत्रमेतत् तद्वविश्चिसतयेभ्यस्त्रैकम् तद्ववि
श्चि सि त य एतेभ्य: परस्तश्चात्रविरुच्यते एकमेवव्यंजनंभवति यथा
तत्रस्ययोनि: इत्रंद्वाश्चराश्चात् इन्द्राय वार्यानस: उद्र: एतेस्वर्ग: संयोगा

प्रा॰
शा॰
११

दयोपिनाविरुध्यते वरडुत्पववनाश्चेन्नवति यथा नामोवीध्यायावाधकार
रेफौयकारश्चसंयोगः वार्धीनसस्तेमन्त्रे रेफधकारौरेफश्चसंयोगः अपामुद्री
मासे इकाररेफौसंयोगः वरइव्यवनानीतिकिं समुद्रायद्विगुमारान् अत्रसमु
द्रशद्वोशिवासमुद्रशुद्धाते उपानुस्थितउत्तंभनमुत्तभानोव्यायोस्थितायेतित्री
णि उपोस्थितः उत्तंभनोउत्तभानोउत्थाय उत्थिताय एतेषुपदेषुस्पर्शाव्या
नित्रीणिव्यंजनानिश्रूयन्तेयथा उपोस्थितोस्तुरः डौतकारौथकारश्चसंयोगः
वरुणस्योत्तंभनमः तथलकाराःसंयोगः दिवमुत्तभान उथस्तकाराःसंयोगः
उत्थायबृहती डौतकारौथकारश्चसंयोगः उत्थितायस्वाहा डौतकारौथ
कारश्चसंयोगः॥ ॥बहिरङ्गः भङ्क्ष्व पङ्क्ति समङ्क्ति पाङ्क्तानि द्वौवनुनासिकोएवोकार ११
पत्नीवर्ज्जमिति बहिरङ्गा भङ्क्ष्व पङ्क्ति समङ्क्ति परिवृङ्क्ति पाङ्क्तान् एवंजातीयेषुपदे
षुस्वर्णा ॥

पूर्वौद्वावनुनासिकौङकारौभवतः आरत्नीशब्दवर्ज्जयित्वा यथा संबहिरङ्गाम्
सम्याभङ्क्ष्णाष्टङ्क पङ्क्तिश्छन्दः पयमाससमङ्क्ति परिवृङ्क्ति हरसा अन्तरित्तायणङ्क्तान्
आपरत्नीवर्ज्जमितिकिं ऊनमस्यमामहत्तन्सरमारपत्नी इद्धंवृद्धिरित्युक्तार्थः
आनन्दपुरवास्तव्यभट्टवज्जटसुतउअटकृतौ प्रातिशाख्यभाष्ये षष्ठोध्यायः॥ ॥ ६
अथावसानानि अथशब्दोधिकारार्थः पदावसानाधिकृतानि वेदितव्यानि
पदान्तकरणस्यादेशयः संधिरुच्यते यावत् कंठ्यस्वरामेकारेणपरिगृह्णी
यात्प्लुतवर्ज्जम् कंठ्याकारस्वरमेकारस्वरमेकारेणपरिगृह्णीयात्प्लुतमाकारं
वर्ज्जयित्वा यथा यच्छन्तामव पचतिपव इविणत्पुर्विपन्यया विपन्ययेति
वि पन्यया प्लुतवर्ज्जमितिकिं विवेश ३ इतिविवेश ३ इवर्णमीकारेण॥ ॥
इवर्णस्वरमीकारेणपरिगृह्णीयात् यथा पशून्पाहि पाहीतिपाहि अग्नि

Indira Gandhi National
Centre for the Arts

नास्त्यृतावती स्यृतावतीति स्त्यृतावती उवर्णवकारेण उवर्णवकारेण
प्रा॰ परिगृह्णीयात् यथा उन्नमानि संतु संत्विति संतु ओकारं च ओकारं ह्रकारे
शा॰ णपरिगृह्णीयात् यथा अभि पिंवाम्यसौ असावित्यसौ हस्वकंठ्योपधं विस
११२ र्जनीयान्तमरिफितं विहृत्याम् हस्वमकारोपधं रिफितं चेद्यद्भवति तत्रवि
र्जनीयान्तमरिफितं विहृत्याम् हस्वमकारोपधं रिफितं चेद्यद्भवति तत्रवि
हृत्यापरिगृह्णीयादिति यथा होताय ज्ञिष्ठो अद्वरेष्वीड्यः ईड्य इतीड्यः अकय
इकय अरिफित इति किं सत अयोनि मसत अविवः दीर्घकंठ्योपधं विसर्जनी
यान्तमेकारान्तमेकारान्तं प्लुतं प्रगृह्यं च दीर्घमाकारोपधं विसर्जनीयान्तं ताद्वि
हृत्यापरिगृह्णीयात् एकारान्तमेकारान्तं प्लुतं प्रगृह्यं च एतानि पदानि विहृत्या
परिगृह्णीयात् यथा दीर्घकंठ्योपधं विसर्जनीयान्तम् यतो जाता अरो वयाः ११२
अरो वया इत्यरो वयाः एकारान्तं यथा मे त्रेतावेमां ऋयो अग्रयं य इत्यग्रये

एकान्तं यथा सहमाद्रयध्वे मादयध्वा इति मादयध्वे प्लुतं यथा भुवनामावि
वेशा ३ विवेशा ३ इति विवेशा ३ प्रगृह्यं यथा उपधापयेते धापयेते इति धा
पयेते अकारान्तं चैके ओकारान्तं यदेके आचार्य विहृत्या परिगृह्णाति यथा
अभिपिंवाम्यसौ आमा इत्यसौ एका इति किं असावित्यसौ भाम्युपधं अरि
फितो विसर्जनीयान्तानि रेफेण अकंठ्यो भावीत्युक्तं भाम्युपधं विसर्जनीया
न्तं रिफितं च यत्पदं तद्रेफेण परिगृह्णीयात् यथा अग्निमीडे पुरोहितमिति नमोभिः
नमोभिः नमोभिः रिति नमः भिः सतं अयोनि मत अयोनि मन अविवः वरि
तिवः प्रथमान्तं सृतायेन प्रथमान्ताः कचटपतपाः तत्र यागजदबाः
प्रथमान्तं पदं तृतीयेन परिगृह्णीयात् अमुमुष्मात् अस्मदित्यस्मत् अत्र
मान्तमुत्तमेन उत्तमान्तं पदमुत्तमेन गृह्णीयात् यथावत्तो हदानूपाव्यं उ

Indira Gandhi National
Centre for the Arts

प्रा॰ पाय्यामितिऋपाय्यम् इडंइडिरित्युदाहार्यः॥ ॥आनन्दपुरवास्तव्यभट्टव
भा॰ ज्रटसुतउवटस्यकृतौप्रातिशाख्यभाष्येसप्तमोऽध्यायः॥ ॥अथातोवर्णसमा
११३ म्नायंव्याख्यास्यामः अथातःशब्दावानन्तर्यार्थौवर्णायस्मिन्समाम्नायन्तेसतथोक्तः
व्याख्यास्यामइतिप्रतिज्ञा तत्रस्वराःप्रथमंव्याख्यायन्तइति तद्यथा अइति
आइति आ३इति इइति ई३इति उइति ऊ३इति ऋइति ऋ३इति
ऌइति ॡइति ॡ३इति अथसंध्यक्षराणि व्याख्यायन्तइतिसूत्रशेषः एइति
ए३इति ऐइति ऐ३इति ओइति ओ३इति औइति औ३इति स्वराव्याख्याताइति अथव्यंजना
नि व्याख्यायन्तइतिसूत्रशेषः किति खिति गिति घिति ङिति कवर्गः चिति छिति
जिति झिति ञिति चवर्गः टिति ठिति डिति ढिति णिति टवर्गः तिति थिति दिति
धिति निति तवर्गः पिति फिति बिति भिति मिति पवर्गः इतिस्पर्शाव्याख्या ११३
ताइतिशेषः अथान्तस्थाः व्याख्यायन्तइतिशेषः

यिति रिति लिति विति इति अन्तस्थाव्याख्याताः अथोष्माणः व्याख्यायन्तइति
शेषः शिति षिति सिति हिति अथयोगवाहाः व्याख्यायन्तइतिशेषः अकारादि
नावर्णसमुदायेनसंहिताः एतेवहन्ति आत्मालोपंप्राप्नुवन्ति इत्येतेयोगवाहाः
तथाहि अःइतिविसर्जनीयःस्वरपूर्वंविसर्जनीयंदर्शयति तथा ᳵकइतिजिह्वा
मूलीयःककारोत्तरंजिह्वामूलीयंदर्शयति एवंसर्वत्रद्रष्टव्यं अःइतिविसर्जनीयः
ᳵकइतिजिह्वामूलीयः ᳶपइत्युपध्मानीयः अंइत्यनुस्वारः हुँइतिनासिक्यः
कुंखुंगुंघुंइतियमः एतेपंचषष्टिर्वर्णाब्रह्मराशिरात्मवाचः यत्किंचिद्वाङ्मयंलोके
सर्वमत्रप्रयुज्यते एतेपंचषष्टिर्वर्णाःसमस्ताएवत्रीणीलक्षणोब्रह्मराशिरेतए
वनकदाचिदनुपूर्वावस्थिताःसन्तःकृत्स्नाःसमस्ताभवन्तीत्यर्थः लौकिक
याचिवाचोयमेवात्मा एतदेवस्पष्टीकर्तुमाह यत्किंचिद्वाङ्मयंलोकेइत्या

Indira Gandhi National Centre for the Arts

प्रा०
न्या०
११४

दिनालोके लौकिकैः अनियतदेशकालाः शुचिना एते च पञ्चवर्णा लोके वेदे च प
रिज्ञाताः यत्किंचिद्वाङ्मयं लोक इत्यादिना लोके लौकिकैरनियतदेशकालाः प्र
युज्यमाना दृष्टाः अतो वेदे तन्नियमार्थं स्वाध्यायविधिः क्रियते शुचिना स्नानाच
मनादिभिः शौचयुक्तेन त्रैवर्णिकेन स्वाध्यायोऽध्येतव्यः शुचौ दे
शे च अनुपहते देशे स्वाध्यायोऽध्येतव्यः तथा चोक्तम् द्वाविमौ वर्जयेन्नित्यमः नश्या
यौ प्रयत्नतः स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विज इति महर्षितिवाद्यो
न शृण्वन्ति तथा स्वाध्यायोऽध्येतव्यः ज्ञानम् एवं स्वाध्यायविधिमुक्त्वा अधुनाय
ह्यस्य ग्रन्थस्यार्थस्य परिज्ञाने फलमाह पौरुषम् प्रकृत्यात्मावस्य साधकं पौरु
षं आयुः घोषवद्ज्ञानयद्वेदस्यार्थज्ञानं तन्मुक्तिसाधकं भवति । स्वर्गसाधकं भ
वति यत्र प्रकृतिप्रत्ययादिपरिज्ञानं तत्स्वर्गायश आयुष्यसाधकं भवति ११॥

यत्र प्रकृतिप्रत्ययादिपरिज्ञानं तत्स्वर्गायशआयुष्यसाधकमित्यर्थो विभाग
दृष्टव्योऽर्थज्ञानस्य अपापि भवति अयमेवार्थः प्रकृत्यात्मोपि श्लोकभवति
वेदस्याध्ययनाद्धर्मः संप्रदानात्तथाश्रुतेः वर्णशोऽक्षरशो ज्ञानाद्विभक्तिप
दशोपि च वेदस्यापारमंत्रान्वावद्धर्मो भवति तथा शिष्येभ्यः संप्रदानात् त
थाश्रवणात् तथा वर्णपरिज्ञानात् तथाक्षरपरिज्ञानात् तथा विभक्तिज्ञा
नात् तथा पदज्ञानात् धर्मो भवत्येतदनुवर्तते त्रयाविंशतिरुच्यं तेस्व
राः शब्दार्थवित्तकैः द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसंग्रहः शब्दस्वरूपवि
केस्त्रयोविंशतिस्वरा उक्ताः द्विचत्वारिंशद्व्यञ्जनानि ककारादीनि एताः स्वर्गसंख्याताः
तस्मिन्ननुस्वारजिह्वामूलीयोपध्मानीयनासिक्यानसंतिमाध्यंदिनानां त्वकार
ज्ञातास्तान्नवर्जम् अथ तेन श्लोकेन वर्णानुक्त्वा अधुनाध्यायमाध्यंदिना

Indira Gandhi National
Centre for the Arts

प्रा॰ नीनेष्वभवर्णास्तानिगकर्तृमाह ऋकारऌकारवनीयोत्रप्रकृतिलृकारजिह्वामू
व्या॰ लीयोपध्मानीयौवृनामिकाश्चैतेवर्णानसंतिमाध्यंदिनानांकिमेतावन्तमेवत
११५ त्सुत्र्यन्ते इकारादीर्घः लाजीहुत्माचीउनिवमादयोयेपठिताःश्रुतान्वर्णामि
तिअन्येश्रुतानसन्तिमाध्यंदिनानामिति वर्णदेवताःप्रकृतानांवर्णानांदेवता
वक्ष्यतिइतिसूत्रशेषः आःकंठ्याः कंठस्थानावर्णाअग्निदेवत्याभवंति नैऋं
त्याजिह्वामूलीयस्थानवर्णानि सोमदेवत्याभवति सोम्यास्तालव्याः तालुस्था
नवर्णाःसोमदेवत्याभवति रौद्राद्दन्त्याः दन्तस्थानवर्णारुद्रदेवत्याभवति औष्ठ्या
प्राश्विन्या औष्ठस्थानवर्णाअश्विनौदेवत्याभवन्ति॥ ॥ वायव्याःशर्द्धन्त्यस्थान
वर्णावायव्यदेवत्याभवन्ति शेषावैश्वदेवाः एतानिस्थानानिविहाययेन्येस्था ११५
नजन्यास्तेवैश्वदेवाभवन्ति तत्समुदायोक्षरम् तेषांवर्णानांमेलकंअक्षरो

भवति तद्यथा कखगघइत्यादि वर्णोवर्णसमुदायोवाअक्षरम्भवति तद्य
था अआइईइत्येवमादिवर्णानसमुदायोक्षरंभवति काखगाघङौइत्येवमादि
व्यवस्थितविभाषाबोध्यम् स्वरः केवलोप्यक्षरंभवतिव्यंजनंतुस्वरसहितमेवा
क्षरंभवति तथाचप्रातिशाख्ये स्वराक्षरं सहाद्यैर्व्यंजनैःउत्तरैश्चावसितैरि
ति तद्यथा ऊर्जे वाजः अक्षरसमुदायःपदमक्षरंवा अक्षरंवापदंअक्षरसमु
दायोवापदंभवति इषेत्वा ऊर्जेत्वा तत्पदंचतुर्द्धातदेवचतुर्धाभिद्यते इति
सूत्रशेषः नामाख्यातोपसर्गनिपाताभवतियथा गौरश्वः पुरुहस्तीइत्येव
मादि आख्यातंभवति पचति पठतिगच्छतिधावतीत्येवमादि उपसर्गापदं
भवति प्रपराअभिः प्रसमादिनिपातपदंभवति वानकमित्यादि नामाख्या
तोपसर्गनिपातइति चतुर्विधवचनंपदचतुष्टयापेक्षं तत्रप्रतिविशेषः

प्रा० सू० ११८ तत्र चपदचतुष्टये यो विशेषः स प्रतिपाद्यते वक्ष्यमाणेन वाक्यशेषः क्रिया
वाचकमाख्यातमुपसर्गो विशेषकृत् सत्त्वाभिधायकं नाम निपातः पादपूरणः
अस्य वर्ण्या पदचतुष्टयोपलक्षणकर्तृमाह क्रियाकालः कर्त्ता संख्या उपसर्गो
विशेषत्वाद्यार्थः तत्र क्रियैव प्रधानं उपसर्गास्तु क्रियामेव विशेषं करोति यथा
पचतीति पाचकः प्रतीयते पुनः पचत्यते आदिकर्मः प्रतीयते एवं गच्छतीत्या
दिषु द्रष्टव्यं सत्त्वधातुः कारकम् धिष्ठीरिति नाम्नोऽर्थः तत्र सत्त्वमेव विशेषतो
भिधत्ते निपातस्त्वर्थासंभवे पादपूरणो भवति चतुर्दश निपाता ये तु दाशा नास्ते
पि संहिताः निहन्यन्ते वल्लाख्यातमुपसर्गाणां चतुष्टये एवनामाख्यातोपस
र्गो निपातनामर्थभेदं व्याख्यायाधुना स्वरसंस्कारयोरपि तत्रेति वेत्यतिपादेषा
ति चतुर्दश निपाता ये तु दाशा नास्ते पि संहिता अथ सास्वसंहिता एव वाचकमुवि ११८

दित्यादिना सूत्रेण निपातग्रहणमुपलक्षणम् नाम्नोपि स्वरस्त्रविहित एव
नोनोमे मरथं इत्यादिना यच्च पदं चतुष्टयेन आख्यातमुक्तं तति हन्यते अनु
दात्तं भवति उपसर्गादिना परभूतं उपसर्गो विशेषकृत् सत्त्वाभिधायकन्ना
म निपातः पादपूरणः इत्येतासामानुपूर्व्यं संगीकृत्यैतदुक्तं निहन्यते ए
त्वाख्यातमुपसर्गाणां चतुष्टये इति लक्षणस्य उपलक्षणार्थः उपसर्गाणा
मपि तत्र स्वरोऽभिधीयते उपसर्गेत्यादिना एतदुक्तं भवति यद्यप्यात्मयाप
तिज्ञातं स्वरसंस्कारयोश्छन्दसि नियम इति कृत्वा प्रतिपादितमिति अतः कृ
त्स्नमिदं शास्त्रमिति कृत्वा श्रावणं व्याशिष्टेः अथ परगोत्राणि एवं चपदचतुष्ट
यस्य गोत्राणि वदन् भारद्वाजकमाख्यातं भार्गवं नाम उच्यते विशिष्टमुपसर्गं
स्तु निपाताः काश्यपस्यतः भारद्वाजेन दृष्टं भारद्वाजगोत्रं भृगुणा दृष्टं भार्गवं

Indira Gandhi National
Centre for the Arts

नथाविशिष्टेनद्दष्टानिपातादृष्टा: कश्यपगोत्रंवा अथपददेवताश्च अथपदानां
प्रा० देवतावृत्यते इतिवाक्यशेष: सर्वस्तु सौम्यमाख्यातं नामंवायव्यमिष्यते आ
शा० ग्नेयसर्गा:स्यान्निपातोर्ण: वरुण स्मृत: सर्वमाख्यातंसोमदेवत्यं सर्वंनाम
११७ वायुदेवत्यं अग्निदेवत्याउपसर्गा:निपातवरुणदेवत्या: अन्यवर्णदेवत्याइत्या
दि उपासनार्थमुक्तं एवंह्युपासिता:संतो ऽभिमतस्याविष्टस्यफलप्रदा
भवंति योहवाविहितार्षेयच्छंदोदैवतेनमंत्रेणयजतिवाध्यापयतिवायाजयति
वाध्यापयतिवास्थाणुंवर्छतिगर्तंवापद्यतइत्येवमादिनाऋणबंधनेच
नकृत्वाभूत्वोवमादिभिस्तुणै:संबध्यते इत्याहस्वरसंस्कारप्रतिष्ठापयिता
भगवान्कात्यायन:एवंस्वरसंस्कारयो:प्रतिष्ठापयिताभगवान्कात्यायन: इदं ११७
शास्त्रमाह इदंश्रुति: इत्यानंदपुरवास्तव्यभट्टवज्रटसूतेनउव्वटेनकृतोपा

निषद्भाष्येऽष्टमोऽध्याय: समाप्त: ॥ ॥ श्रीमालज्ञातीयसमदा
प्रा० वादवास्तव्यभट्टलक्ष्मीधरसुतश्रीचावीदासेनलिखितं ॥ ॥ संवत् १७ ६१
शा० मार्गशुदि सप्तम्यां चंद्रवारे इतोलाहोरतोमयादासपंडितहेरामने
११८ नलिखितम् राम राम राम राम

श्रीमत्श्रीपंडितमुकुटरत्नपरमाध्यनमस्वामिवरश्रीमहाराजजगन्नाथ
चरणारविंदेषु सस्नेहाशीर्भातृवरलालाचिरंजीवस्तुदृक्यत्त्वतिपत्रिकी
भूयात्पत्रमिदं मयादासपंडितहेरामनेन च पंडितआत्मारामेन
नमस्कारंचरणप्रहितं इहैवकल्याणंत्वयाकल्याणंकांक्ष्यामा: इतिशुभं

Indira Gandhi National
Centre for the Arts

श्रीमहाराजाजी ओरदयाकरणी पृथ्वीप्रतिपालभिजो
ओर कागिकान्यास पुजी लिखनाहै ओरवुगी लिख भिजना
कुरे